॥अथप्रायश्चित्तकुतूहलेदर्शपूर्णमासप्र०॥
॥पत्र४६॥

१ ॥श्रीगणेशायनमः॥ ॥श्रीनृसिंहायनमः॥ ॥नमस्कृत्यगुरूनिष्टान्निष्टेष्टजननु
दितान्॥विनिष्टतद्याप्तयेऽस्त्वमथब्रुवे॥१॥तत्रेष्टिकालः॥सामान्यतो
यदृच्छापशुनासोमेनयजेतसोमावास्यांपौर्णमास्यांवायजेतेतिश्रुतिः॥विशे
षस्तुसंधौयजेतेति॥संधिश्चैनचपर्वप्रतिपदोस्तूरीयप्रथमभागोऽत्रस्मृते॥
पक्षांताउपवस्तव्याःपक्षादोयष्टव्याइतिश्रुत्यंतरात्॥पर्वणोयश्चतुर्थांशत्रा
द्याःप्रतिपदस्त्रयः॥यागकालःसचिन्त्यःप्रातरुक्तोमनीषिभिरितिस्मृतेश्च॥
तत्रतिथ्योःपरीत्वेपूर्वेद्युरग्निंगृह्यात्परमहर्यजेतेतिपूर्वदिनेनु०ष्ठेयान्वाधा १

नस्योत्तरदिनेकर्त्तव्ययागस्यचस्वोचितकाललाभान्नसंदेहः॥तिथेःस्वंस्वत्वेतुसं
देहेनिर्णयःकर्त्तव्यः॥तत्रपूर्वाह्णमध्याह्नसायाह्नरूपभागत्रयात्मकस्याह्नः॥पू
र्वाह्णेनायमध्याह्नेयदिपर्वसमाप्यते॥उपोष्यतत्रपूर्वेद्युस्तद्दर्यागदृश्यते॥उ
र्ध्वंमध्याह्नतःसंधायचाधानंतुतद्दिने॥इहिपरदिनेकुर्याद्योवाजसनेयिनः॥सं
धिःस्यात्संगवादूर्ध्वंप्राक्सपर्वावर्त्तनादधेः॥सापौर्णमासीविज्ञेयासदयुक्तालवि
धौतिथिः॥वृद्धिःप्रतिपदोयास्तितदर्धंपर्वणिक्षिपेत्॥क्षयास्यार्धंतथाक्षि
प्त्वासंधिर्निर्णीयतांसदा॥मनुरादितीयाचिमुक्तौचेन्नतिपद्यापराह्णिकी॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

२ अन्वाधानं चतुर्दश्यो परतः सोमदर्शनादिति॥ वचनंतदाश्वलायनान्त्यापस्तंबा न्यतिवानप्रवर्त्तते॥ चंद्रदर्शननिषेधवचनंच॥ नचापराह्णसंधिमस्यमाद्दृत्ती यदिनेचंद्रदर्शनप्रयुक्तनिषेधस्याश्वलायनान्त्यप्रवृत्तावपि॥ नयष्ट्यंच तुर्थेन्योयागैःप्रतिपदःक्वचित्॥ रक्षांसितद्धिकुर्वंतिदूषयंत्याश्वलायनाइति॥ द्वितीयासहितंयस्माद्दूषयंत्याश्वलायनाइतिहस्माहचैषदूकुर्वस्मिन्मासांतेप चतेतिवाक्येगतवाद्विग्रहस्यविवक्षात्रयोज्यकपक्षन्यायेनाश्वलायन पदस्याविवक्षितत्वात्॥ संधिर्यद्यपराह्णस्याद्यागःप्रातःपरेहनि॥ कुर्याणः २

आश्वलायनपदोपेतनिषेधप्रवृत्तिर्भवेदेवेतिनवाच्यं॥

तिपक्षागेचतुर्थेपिनदुष्यतीतिवद्दृग्गतापवाक्येनप्रतिप्रसवविधानाद्वे त्यन्यत्रविस्तरः॥ एवंविहितकालेन्वाधानेनरुतेसर्वप्रायश्चित्तमिष्टिदिनेकु र्यात्॥ उक्तरूपेमुख्यःकालः॥ दर्शेष्टेःपूर्णमास्यामिष्टेरर्वाग्गौणकालः॥ पू र्वः मासस्यामावास्यातिष्टेरर्वाग्गौणकालः॥ आपदिगौणकालेप्यनुष्ठानेन प्रायश्चित्तमित्येके॥ भवतीत्यन्ये॥ तच्चाग्रेवक्ष्यते॥ अथयदिप्रथमारंभोमुख्य कालेदेवान्मानुषादाप्रतिबंधान्नसंपद्यतितदानींगौणकालेतदनुष्ठानं॥ अ ग्निमेवोर्वमास्यांप्रतिबंधनिवृत्तौविश्वेदेविकर्तुसारस्यतहोमोन्वारंभणी

३ यंचक्रन्याविभ्रष्टिंकुर्यात्॥तदुक्तंकारिकायां॥विभ्रष्टेर्भवेद्यत्रविभ्रष्टे
षेतत्रदेवताः॥अग्निरिंद्रश्चसोमश्चपौर्णमासोदितादृयोः॥ऋचआग्न्य
योरुक्तःसोमयाज्यानुवाक्ययोः॥दर्शपौर्णमासोदितंतंत्रमवशिष्टंकरोतिचे
ति॥अत्रपौर्णमासपदंदर्शस्याप्युपलक्षकं॥दर्शपौर्णमासेरंभस्याभाव
त्॥तेनदर्शपौर्णमासोदिताःदर्शपूर्णमासोदितास्त्यर्थः॥तस्याःप्रयोगः॥॥
प्राप्तकालेदर्शपूर्णमासयोरनारंभनिमित्तंक्रियमाणविभ्रष्टेष्ट्वायंत्र
न्यारंभणीयेष्ट्वायक्ष्येइतिसंकल्प्यास्मत्कृतप्रयोगरत्नभूषायामुक्तप्र ३

कारेणांकुर्यात्॥नात्रान्वाधानबर्हिराहरणयोस्तंत्रमितिविशेषः॥एवमन्वा
रंभणीयंसमाप्यदर्शपूर्णमासयोरनारंभनिमित्तंविभ्रष्टेष्ट्वायक्ष्यइ
तिसंकल्प्यतिथावनुष्ठीयतेसंकल्पेतस्याःकीर्त्तनं।पौर्णमासंतंत्रं
।आग्नेयोष्टाकपालः।ऐंद्रएकादशकपालः॥सौम्यश्चरुः॥पात्रप्रयोगे
एकोनविंशतिकपालानि।चरुस्थाल्यौमेक्षणंचेतिविशेषः॥निर्वपकाले
आग्नेयंनिरूप्यैंद्रंनिरूपसोमायचरव्यान्निर्वपति॥अधिश्रयणका
लेआग्नेयंचैंद्रंयथासंस्रवेभवतस्तथाहवींष्यधिश्रयेत्॥पुरोडा

सौम्यं

४ ग्राधिश्रपणात्सूर्य ग्राग्नेयपुरोडाशोकदेशंसोम्यचरोः कतिपयतंडुलानेंद्रपुरो
डाशेसंसृज्यश्रपयेदित्यर्थः॥उभयोर्ग्रहणंवाग्नेंद्रपुरोडाशोनिर्माष्टीतिप्रायश्चि
त्तप्रदीपे॥ग्रग्निर्मूर्द्धेभुवोयस्येत्याग्नेयस्य॥ग्रन्वाहः॥एंद्रमानसिरयिंस
त्रित्यानंसदासहं॥वर्षिष्ठमूतयेभर।ॐम्॥येऽयजामहेंद्रंबलेनसाहिषेपु
८सु॥२ रुहूतमाशूंजेष्ठस्तुश्मरद्गातिरेंद्राभरदक्षिणोनावस्तनिपतिःसिंधूना
मसिरेयतीनांऽयोऽषट्॥ईंद्रस्यहृदेय॰ईंद्रियाय्यन्वाहः॥सोमयास्ते॰या
तेधामानिहविष॰वत्रहतिश्रोतद्रव्यो॥ग्राग्नेयएवदितिप्रदीपे॥पुनरालं ४

भ्यजेंसेतिष्ठते॥ततःकालेपौर्णमासः॥कृतायामन्वारंभणीयायांपुनः
केनापिविघ्नेनपौर्णमासोऽतिपद्यतेतदाऽग्नीषोमीयंपशुंसप्तहोतारंकृ
त्वापौर्णमासारंभतिकेचनाचार्याः॥चतुर्होतारंकृत्वेतिप्रदीपिकायां॥प्रथमदर्शो
तिपन्नेग्रागामिदर्शेनयजेतेत्येके॥विघ्नेष्टिंकृत्वागौणकालेपिप्रथमद
र्शंकुर्यादनमित्यन्ये॥विघ्नेष्टिंविहायपथिकृदैश्यानयौकुर्यादित्यपरे॥
नमतुपौर्णमासारंभेनदर्शस्यारभ्यत्वान्नविघ्नेष्टिरावश्यकीत्यन्ये॥ग्रन्यथाष्ट
घ्नन्वारंभणीयारंभनिमित्तास्यात्॥ग्रतोऽस्मात्सत्रेदर्शस्यपूर्णमासस्य

५ वानिक्रमेविहितापाधित्यिवान्त्रोचितेतिप्रतिभाति॥ रुद्रद त्तरुपक्रोतानामिष्टि
पश्वंगमध्येविन्त्रेषेविन्त्रेष्टिः॥ अनारभ्यदर्शपूर्णमासातिपत्तौनेत्रायश्चि
त्तकरणमिति॥ कुर्यादितिवोधायनोनकुर्यादितिवाल्लीकिरितिद्वेधे॥ एवमनालं
भुकायामपित्रेयं॥ पूर्णमासादिकर्मणांप्रथमेप्रयोगेसंकल्पाङ्गेदितीयादि
प्रयोगेसंकल्पास्त्रर्वमपिरजसितामपरुध्येवयागः॥ योक्तंतत्रैविध्युक्तप
कारेणप्रक्षाल्यशुचिदेशेस्थापयेत्॥ विनोक्तकालेमंत्रेणपंयज्ञमानःकु
र्यात्॥ एकपत्नीकश्चेत्॥ बहुपत्नीत्वेतुतत्कर्मान्याकुर्यात्॥ पत्नीत्वसामान्या ५

त्॥ सर्वप्रायश्चित्तेच॥ अन्वारंभणीयायाआरंभास्त्रर्वंयदिपत्नीरजस्वलातदा
कालांतरेविभ्रष्टेष्ट्यर्थंसारस्वतहोमंअन्वारभणीयांचरुत्वापुनःसारस्वत
होमाद्यन्वारंभणीयांयासहपोर्णमासीकर्त्तव्या॥ कृतायामन्वारंभणीयायांके
नापिप्रतिबंधेनदर्शपूर्णमासातिपत्तिस्तदागामिपोर्णमास्यांसतहोतारंचतु
र्होतारंवाकृत्वापूर्णमासःकर्त्तव्यः॥ प्रणीताद्याग्नेयंतुनारंभप्रतिबंधकं॥ स्मा
र्त्तस्यश्रौतंप्रतिदुर्बलत्वात्॥ अतएवरुद्रदत्तः॥ आग्नेयेचाप्यग्निहोत्रदर्शपू
र्णमासयोःकर्त्तव्यतायुक्ता॥ एतेनज्ञातेरपिव्याख्यातेत्युक्तवान्॥ उदाजहा

६ रच बौधायनोक्तं ॥ सहस्नाहबोधायन उवाच तावन्निर्हरेत्तावन्निर्वपेदिति ॥ जातए
वविद्वित्वेतिश्रुत्यन्तरं किंचिति ॥ पिंडपित्रयज्ञस्त्वंयदिपत्नीरजस्वलातदाभ्रधर्मा
द्यन्यतमेनप्रतिबंधेनपिंडपित्रयज्ञारंभोनभवतितदाभागामिदर्शेसन्नहोना
रंभेत्यापिंडपित्रयज्ञआरब्धव्यइतिश्रुत्यन्तरंद्रष्टव्यमारब्धायां ॥ यदिप्रथमप्रयोगेपित्र
ज त्येहनिपत्नीस्नाताभवतिनीरजस्कावतदापिभवतिकर्मारंभः ॥ पत्नीकर्माणिच
॥ तेयेयदितीयादिप्रयोगेयजनीयेहनिस्नातायामपिकर्मार्तिभवंति ॥ श्रोतक
र्मतांस्नानदिनेप्यनुष्ठानमितिभाष्यात् ॥ एवंनैमित्तिकेप्रायश्चित्तेष्ट्यादौभ्र ६

करणेप्रत्यवायस्मरणात् ॥ कालांतराभावेसंकल्पात्सर्वमपिरजस्वलांतामप्रयुंजी
वतदनुष्ठेयं ॥ सतिकालांतरेनतामप्रयुंजानःकालांतरएवतदनुष्ठानं ॥ एता
दृशेकर्मणिसत्यप्याग्नेयेचयजमानस्यकर्मकालेशुद्धिरस्ति ॥ ऋत्विजामपिप्र
वृत्तेकर्मणिनाग्नेयंचमितिविवेकः ॥ अन्येतुऋत्विजामाग्नेयंचाभावःसमंचवरण
एव ॥ गृहीतमधुपर्कस्ययजमानाच्चऋत्विजः ॥ पश्वादाग्नेयंचपतितेनभवेदि
तिनिश्चयइति ॥ एतेनस्मार्तेपितुलाकोटिहोमादौमधुपर्केसतिदोषाभावोते
यः ॥ श्रोतेघपिश्राधानेपिपशुबंधादौमधुपर्कोभावेन्येभवंतीतिज्ञेयं ॥ य

तुप्रारंभोवरपंयत्नइतितत्संतिमधुपर्केत्तेयं॥ नान्यथेति॥ अथयदिदर्शपूर्ण मासादिकर्मणांद्वितीयप्रयोगःकेनापिनिमित्तेनमुख्यकालेनज्ञायेतत्तदागौण कालेकर्त्तव्यः॥ तत्रनिदानसूत्रं॥ सर्वमहःप्रातराकुतेःस्वाहेतिसर्वारात्रिःसायमा कुतेः॥ पूर्वपक्षोदर्शस्यशुक्लपक्षःपूर्णमासस्येति॥ अत्रकेषांचिदुपादानंतुल्य न्यायानोपात्तार्थं॥ तेनचातुर्मास्यपर्वणामाग्रयणस्यपिंडपित्रयज्ञस्यचपरका लात्माकृप्रायश्चित्तपूर्विकाक्रियाभवतीतिधूर्त्तः॥ मंडनोपि॥ आग्रयणप र्व्वतानांकर्मणांपरकालात्प्रागौणकालमभिधायसोम्यतउक्तवान्॥ एवमा

मिकमंगमुख्यकालादधस्तनः॥ स्वकालादुत्तरःकालोगौणःस्यात्सर्वक र्मणइति॥ अन्येतुयावदचनं वाचनिकमितिन्यायेननिदानसूत्रोपात्ता नामेवैषकालव्यपदेशइतितेनपिंडपित्रयज्ञस्यनगौणकालेप्यनुष्ठानं॥ अ स्मिंश्चगौणकालेप्रायश्चित्तंकृत्वाकर्मकार्यं॥ प्रायश्चित्तमेवनकर्मेतिभा ष्यकारादयः॥ ॥मंडनस्तु॥ ॥यद्वागमिक्रियामुख्यकालस्याप्यंतरालवर्त्ति॥ गौणकालत्वमिछंतिकेचित्प्राक्तनकर्मणि॥ गौणेष्वेतेषुकालेषुकर्मचोदित मादरात्॥ प्रायश्चित्तप्रकरणेप्रोक्तानिकृतिमाचरेदिति॥ अनापदिगौण

८ कालेप्रायश्चित्तपूर्वककर्मानुष्ठानं॥ आपदि गौणकालेतुनतत्॥ गौणकाले
प्यतिक्रांतेप्रायश्चित्तमेव॥ नकर्मलोपानुष्ठानमितिप्रदीपे॥ एवंपिंडपित्रयज्ञा
दित्यये आगामिदर्शेपाणिसंमर्शनात्पूर्वंसमिष्टयजुषःपूर्वंवागार्हपत्येआज्यं
संस्कृत्यदार्शिकाज्येनवाचतुर्गृहीतेनाःहवनीयेसप्तहोतारंजुहुयात्॥ समिष्टय
जुषःपूर्वंहोमपक्षेदार्शिनेवाज्येनेतिविवेकः॥ महाहविर्होता॥ सत्यहविर
ध्वर्युः॥ अच्युतपाजाअग्नीन्॥ अच्युतमनाउपवक्ता॥ अनाधृष्याश्चाःप्र
तिधृष्यश्च॥ यज्ञस्याभिगरो॥ अयास्यउद्गाता॥ वाचस्पतेहविधेनामन्॥वि ८
हू

धेमनेनाम॥ विधेरत्वमस्माकंनाम॥ वाचस्पतिःसोममपात्॥ मादेयस्तेनुम्रोदिमा
मनुष्यः॥ नमोदिवेनमःपृथिव्येस्वाहा॥ वाचस्पतयेब्रह्मणेदं॥ यद्वाइष्टेभ्य
इत्येषोजुहुयात्॥ तदाहगोपालः॥ प्रयाजाद्यंगयज्ञानांपित्रयज्ञस्यचात्यये॥
स्रुवेणेष्टेभ्यइत्येषोजुहुयाद्यावहतीस्तूष्णीमिति॥ ॥ इतिदर्शपूर्णमासयोःप्रथ
मारंभेकालातिपत्तौप्रायश्चित्तं॥ ॥ अथयोयक्ष्यइत्यक्त्वानयजेतसत्रेणा
तमायजेत॥ ॥ तस्माःप्रयोगः॥ ॥ यक्ष्यइत्यक्त्वायजनंनिमित्तंत्रेधाते
व्या यक्ष्यइतिसंकल्पः॥ व्रीहिमयौदुपरोडाशौ॥ मयमयश्चैकः॥ इध्मसं

भरणेतत्स्योत्रयोविꣳशतिधेत्यृहः॥पात्रासादनेदादशकपालानिश्रपयेदयमिति
विशेषः॥वेषायत्वेतिअग्निहोत्रहवणीश्रपयेदंश्चादत्ते॥प्रथमश्रपेरंद्रा विष्णुभ्यां
नुष्टंनिर्वपामीतिग्रीहीन्निर्वपेत्॥अवहननकालेव्रीहीनवहत्ययवानवहंति॥
नानाबीजधर्मेणप्रस्कंदनंनेरुत्वापेषणकालेव्रीहीन्पेषयित्वायवान्पिनष्टि
॥कपालोपधानेउत्तानानिकपालान्युपदधाति॥ततोव्रीहिपिष्टानांसंवप
नादिमस्यस्यशिरोसीत्यंतंरुत्वासंक्षालनमन्यस्मिन्पात्रेनिधायतस्या
मेवपिष्टोदपन्यांपक्षेद्वितीयस्योवायवपिष्टसंवापनादिपिंडांतंरुत्वात्र

यागमभिमर्शनांतंकुर्यात्॥पुरोडाशानुत्तरोत्तरंस्थूलान्कुर्यात्॥अधिश्रयणा
कालेप्रथमंव्रीहिमयंपुरोडाशमधिश्रित्यचंद्राहयित्वातस्योपरितंतोस्यायांसंय
वमयमधिश्रित्यचंद्राहयित्वातदुपरितंतोस्थूलंव्रीहिमयमधिश्रयेत्॥तस्या पि
न्वचंद्राहयेत्॥उपायेस्तंमयित्वाग्नेनिरूप्यपर्यग्निकृत्यश्रपयति॥देवोवः
सविताश्रपयतुवर्षिष्ठेअंनाकेग्नेर्वस्तनुवंमातिधाक्॥अग्नेहव्यꣳरक्षस्वेति॥
संप्रत्यणाष्टचर्धं॥संक्षालनहयमेकीकृत्याप्येप्योनिनयति॥हविरुद्वासन
कालेस्योनंवःसदनंतस्मिन्त्सीदतामतेप्रतितिष्ठत यवानां

१० मेधाः सुमनस्यमानाः॥ सूर्यज्योतिर्विभाहि महत इंद्रियाय। आप्या॰ स्वमङ्गं
स्वचमङ्गं सुरूपा वो वसुविदः पश्वो तेजसेंद्रावि छुभ्यं नुदानभि धारयामि
॥ऋतावृत्स्नोतिजनितारोमतीनां॥ आद्रीः प्रथस्व वो भुवनस्य गोपाः। यो व
आत्मापशु प्रविष्टस्तमङ्क्ष्वं॥ होता॥ ओचिष्के शास्तमी महो३ प्रसो अग्नेत
वेति॰ यस्त्वंस्य मावरो३ प्रहोत्रेऽर्ध्वयो चो॰ बृहत्। वि वोऽग्नो तीषिबिन्त
तेनवे धसो३ समिद्धो अग्न आहुत॰ त्वं हि हव्यवाळसो३ मग्नेत्री तेवाजि
नात्री षधस्छा त्तिस्रस्तेजिक्रा ऋतजात पर्वीः॥ तिस्र उते तन्वो देववा १०

तास्तामिनः पाहिगिरो अप्रयुछन्निः३ मग्नेमहाँ असिब्राह्मणभारत॥ अधानमु
पांशु॥ इंद्रावि छुभ्यामनुब्रूहि। होता संवोकर्मणासमिषाहि नोमी द्रावि छुअ
पस स्पारे अस्य॥ जुषेथांयज्ञं द्रविणं चधत्तमरिष्टेनः पथिभिः पारयंताऽ३
माकिर्नेमा संविजिध्वं मायोहि ऽसिषेमावस्तोपक्रमीत। भ
ता रतमुद्रतेमनुषिंचोवदानानिवः प्रत्यवदास्यामिनमो वो अस्तुमाहि ऽसि
ए॥ यदयदानानिवोवद्यन्विलो ॰म्पेनतद आप्यायतांपुनः। एकदासर्वे
पुरोडाशायथा वक्ता स्युस्तथोपायेनावद्येत॥ इंद्रावि छुयज। होता यें३

११ हेरंद्रावि॒ष्णूउ॑पभाजिग्यथुर्नपराजन्येवेनपराजिग्येकतरश्चनेनोः॥ इंद्रश्चविष्णो
यदपस्पृधेथांत्रेधासहस्रंवितदेरयेथांवी॰३इंद्राविष्णोर॰क्षत्रहाभ्यासं॥
स्रिसत्र्आज्ञा
स्विष्टकृत्॥त्रीण्यार्षेयंषितवज्रातवेद्
नीरुषसस्तेअग्ने॥ताभिर्देवानामवोयक्षिविद्वानथाभवयजमानायशंयोः३अं
।ये॰देग्निंस्विष्टकृतंजुषंतोहविरग्निस्त्रीणित्रिधात्न्याक्षेतिविदाधाकविः
॥सत्रीरेकादशांइहयक्षच्चपिप्रयच्चनोविप्रोदूतःपरिष्कृतोनसंतामन्य
केसमेवो३०॥अन्वोहार्यमासाद्यशतमानंहिरण्यंघृतांक्तंताम्रवर्णंवा ११

सोधेनुंवादक्षिणां॥अग्नयेहिरण्यं॥सोमायवासः॥रुद्रायगामितिप्रतिग्र
हः॥सममन्यत॥ पुनरात्मंभवर्जसंतिष्ठतेग्निः॥ ॥तत्रर्चौ॥ ॥
वश्येत्रेधातवीयेष्टिंप्रसो॰अग्नेतवेत्यृचे॥प्रहो त्रेपूर्वमित्येतेउपांत्यायाऋ
चःपरां॥आवपेत्समिधेनीषुसमिद्धोअग्नआहुत॥इत्युक्त्वाज्यमवोक्ष्यत्रि
रग्ने३तिइत्यृचं॥उत्क्षाज्यभागावावाद्येंद्राविष्णूदेवता॥तामावाद्याज्य
भागांतंकुर्यात्संवाम्रंचंवदेत्॥उपभाजिग्यथुरित्युपायाइंद्रावैष्णवीभवे
त्॥त्रीण्यार्षेयंषितवेत्यग्निस्त्रीणीतिस्विष्टकृत्यर्चौ॥अक्तादिप्राक्षतं

कुर्यादसंस्थाजपतः सुधीरिति॥एवंत्रेधातवीयेष्वेष्वसंकल्पोत्सृष्टयज्ञेन
१२ यजेत॥ ॥अथयोयक्ष्यइत्यक्काधानादियत्किंचिदंगंकृत्वायदिनयजेत
सविभ्रष्टेष्वायजेत॥यक्ष्यइत्यक्काराभ्यांयजन निमित्तत्वाविभ्रष्टे
ष्वायक्ष्यइतिसंकल्पः॥प्रयोगःपूर्वोक्तएव॥ ॥अन्याहिताग्न्यनुगम था
नेप्रायश्चित्तविधिः॥ ॥तत्रविकृतानामन्याहितानामजस्राणांचाग्नी ना
मनुगमनेतुल्यमेवप्रायश्चित्तं॥ ॥ यदाहबौधायनः॥ ॥अरण्यीग १२
तानामात्मगतानामजस्राणामन्याहितानांसर्वगतानांचाग्नीनामुद्वा

तानांप्रायश्चित्तमित्युपक्रम्याहवनीयेजुहोतिमनोज्योतिरिति॥तथाग्नीनामु
द्वातानांप्रायश्चि त्ता कृतयश्चतुर्होतारइत्येकेव्याहृतयइत्येकेमिश्राहुती
इत्येकेमनस्वतीत्येकइति॥आश्वलायना अपिगार्हपत्यानुगमनेऽ
वक्ष्यमेभ्योमंथनपूर्वंनपस्त्यंतंविधायदक्षिणाग्न्यनुगमनेचतामेवो
य न्कारैमियाजस्रगार्हपत्यस्यान्याहितगार्हपत्यस्यानुगमनेदक्षिणाग्नेश्चा
नुगमनेप्रायश्चित्तिरितिवदंतःताहृत्वाहवनीयानुगमेपितदेवप्रायश्चि
त्तमित्यरत्नयन्॥नहिहोमप्रकरणेबहुवित्यणायनादिज्योतिष्मत्यंतं

१३ विहितंप्रायश्चित्तंसर्वत्रप्रवर्त्तते॥प्राक्पूर्वाकुतेरित्यादिनातादृग्प्रायश्चित्तस्यनत्रैवनिवेशात्॥एवंचगार्हपत्यदक्षिणाग्न्यनुगमनवत्॥आहवनीयानुगमेपितपश्चत्येवंभवतीतिसूत्रान्तरस्मरणादवधेयं॥कंठरवेणोक्तमप्येतरेयब्राह्मणे॥यस्यसर्वाग्नयउपशाम्येरन्नग्नयेतपश्चतेजनदृतेपावकवतेष्टाकपालंपुरोडाशंनिर्वपेत्॥आहवनीयानुगमनेप्रायश्चित्तविशेषउक्तइतिचदर्शोव्यक्तिकारस्याग्निर्ज्योतिष्मान्च रुणइत्येवाहवनीयानुगमेप्रायश्चित्तं॥एवंचयेकेचिदन्वाहितश्चलेश्चाश्वलायनानामपिम १३

नस्वतंत्राङ्गत्वाच्चेत्यं॥सर्वावस्थेघपिबोधायनोक्तरीत्यातथात्वापत्तेः॥तत्रायंक्रमः॥विद्यमानेआहवनीयेचाहिताग्नेर्वास्तेगार्हपत्योयद्यनुगच्छेत्तस्मिन्नेवाग्नौमंथनादिपूर्ववत् कृत्वातपश्चतीपूर्णाहुतिंवाविधाय।समाग्नइत्यादिपूर्ववत् गार्हपत्यमन्वाधीत्याहुतिभिस्तमेवोपतिष्ठेतनाहवनीयानुगमनंनवासहभस्मानमितिपक्षः॥तदाहगोपालः॥यदिचेद्गार्हपत्याग्निर्नश्येदन्वाहितस्तदा॥मंथनंत्वेवकर्त्तव्यंनोद्धरेत्सर्वपावकमिति॥केचित्त्वापिसहभस्मानमितिपक्षंमन्यंते॥एवंदक्षिणाग्न्याहवनीययोरप्यनुग

मने ऽग्न्याधानकर्मोपपद्यते॥ इत्यग्न्याहिताग्न्यनुगमनप्रायश्चित्ते॥ अथाग्न्याहि
ताग्नेः प्रमीतपत्नीपृथगग्नीन्नयेयुः॥ पृथग्ग्रहणमसंसर्गार्थमितिकश्चित्॥
एकस्याने काग्निगमनंमाभूदित्येवमर्थमिति देवयातः॥ उपपत्तिवचनेऽ
नात्माधीनगमनसूचनार्थं॥ चोराद्युपद्रवेणाग्न्याहितदेशोऽवस्थातुमश
क्यतायांऽग्न्याधानादीष्टिसमापनात्पूर्वमग्नेनयकोरेणाग्नीनादाय गं
तव्यमान्यथेत्यर्थः॥ बहुवचनंपुरुषांतरप्रायस्यर्थं॥ पुरुषांतरैर्नीयमा
नेष्वग्निषुपत्नीयजमानोऽन्वारभेयातां॥ अत्रविशेषोऽजस्रंपटलेत्र १४

यामंप्रकल्प्योक्तः॥ यावत्योग्रामसमर्यादानद्यश्चतावतीअतिक्रामंतोऽन्वारभे
यातामिति॥ नदीलक्षणंप्रायश्चित्तप्रदीपे॥ अष्टोधनुःसहस्राणिपरिस्रव
तियज्जलं॥ नदीशब्दाभिधेयत्वंतस्येच्छंतीहसूरयः॥ एकेनाभिधेयेनेत्या
तयोजनगामियत्॥ उदकंतंनदीशब्दवाच्यमित्यपरेजगुरिति॥ एवमन्वा
रंभप्रदेशेपुनरन्याक्यविषयेऽवश्यमन्यतरान्वारंभेणाभाव्यं॥ तदभावेऽग्नयो
लौकिकाभवंति॥ तत्राऽग्न्याधेयंप्रायश्चित्ते॥ अजस्रानग्नीन्हरंतःग्राम्या
रण्यादवाद्रोछुसेयुः॥ यदिछुसेयुरग्नयोलौकिकाभवंति॥ भ्रमोनिधायो

छ्रासेनतुनदोषः॥ ग्राम्यापरासादूर्ध्वंहरणेतूच्छ्रासेनदोषइतिप्रयोगे॥ दक्षिणेत्र तु॥
१५ यागकालेविहारदेशेपिकापिसंचारयितव्येअनुच्छ्रसतासंचारयितव्यः॥ अ
विहृतस्येवगार्हपत्यस्येषनियमः॥ विहृतानांसर्वेषांयुगपन्नयनेपिभव
के ति॥ नैकस्यनयने॥ अनस्यानयनेक्वचिदपिअनुच्छ्रासनियमोनास्ति॥
अनेनैवप्रकारेणाग्नीन्सर्वत्रानयेत्॥ अन्यथालौकिकत्वंस्यात्॥ अज
स्रपटलेनकाष्ठारंभणंकेचिद्योगाक्ष्यादिनिबंधनात्॥ उदक्याचेद्भवे
त्पत्नीप्रसूताप्रवसत्यपि॥ अन्यारंभविकल्पत्वात्सुनरोधिनतन्मतात्॥ १५

ज्येष्ठान्वारभतेवह्निंवहुभार्यस्यनेतरेति॥ यत्नपार्श्वे॥ स्त्रीकेनोद्वाहयेदग्नीन्यु
नरधानमर्हति॥ आश्वलायनस्मृतौ॥ नाग्निनासहपुष्पंवाजलंवान्नंचवानये
त्॥ असाध्वीस्त्रिरमावह्निंनाहरेज्जलंतथा॥ तथागंधांस्रपुष्पंचनवहेद्दोदनं
द्विजइति॥ ॥समारोपणमप्याहाचार्यः॥ तुभ्यंताग्नेगिरस्तमेतिवाज्याहुतिंजु
त्वासमारोपयेदिति॥ यद्वागार्हपत्येआज्यंसंस्कृत्यजाचाहवनीयेस्रुवेण
जुहोति॥ लौकिकाग्नयस्त्वेतेनैवतुभ्यंताग्नेगिरस्तमविश्वासुक्षितयःपृथ
क्॥ अग्नेकामायधेमिरेस्वाहेति॥ अग्निर्देवता॥ तनोदक्षिणेनोत्तरारणीस

१६ नेनाधरारणी॰आदायगार्हपत्येप्रतितपतियजमानः॥॰अयंतेयोनि र्ऋत्वियोय
तोजातो॰अरोचथाः॥तंजानन्नग्न॰आसीदाथानोवर्द्धयाग्गिरः॥तूष्णींदक्षिणा
ग्माहवनीययोनिति॥दक्षिणाग्नेर्ग्हिन्नयोनित्वेतुतस्याप्यरण्यंतरेमंत्रे
णेतिवृत्तिकृत्॥॰अन्याहितानामजस्राणांवागार्हपत्येप्रतितपनमा
त्रेणोक्तयाणांसमारोपणंकृतंभवतीतिसिद्धांतेभाष्ये।दिक्षुजातस्कृ
॥॰अन्याहितेषजस्रेषुचाधर्युर्यजमानोवाग्निष्वग्निषुक्रमेणासमंत्रं
॰कृतारणीसमारोपणंकुर्यात्॥॰आज्याहुतिंब्रह्मैवजुहुयात्॥तन्मते १६

पिमंथनस्यानावृत्तिः॥॰अनुकृत्यात्॥॰आज्याहुतिंयजमानोजुहुयादिति
सिद्धांतभाष्ये॥॰अत्रापिप्रवचनाच्चारंभः॥॰आहुतिंहुत्वापाणीवाप्रतितपेत्॥
याते॰अग्नेयज्ञियेति॥एवमेवसोमार्थेविहतेष्वग्निषुप्रयाणप्राप्तौज्ञेयं॥तत्र
प्रत्यग्नितपनंनेतिकेचित्॥भवतीत्यन्ये॥ततोनिरूपद्रवदेशंगत्वाविहारं कृ
त्वायित्वामंथयेत्॥स्वयंवामंथेत्॥॰अत्यवरोहज्ञातवेदःपुनस्त्वादेवेभ्यो
हव्यंवहनःप्रजानन॥॰अग्नेपुरिषमस्मासुधेत्यथोभवयजमाना
येत्रांयोरिति॥जातमग्निंगार्हपत्यायतनेनिधायोऽग्निहुयंप्रणीयगा

१७ दक्षपत्ये आज्यं संस्कृत्याहवनीये सर्वप्रायश्चित्तं हुत्वा प्राकृतं कर्म समाचरेत्॥ पाल्यग्नितपनपक्षे तु मंथनमारभ्य यावद्गर्भिणीसूतिकास्नेवास्ति॥ समम न्यत्पूर्वेण॥ अन्यदागमनेप्ययमेव विधिरिति देवयाजिनः॥ अनन्वाहिताग्नेस्तु सभार्यस्याग्निभिः सहागमनप्रसक्तौ नाग्नीनां प्रत्यक्षनयनमितिसिद्धौ तभाष्यकृत्तिकृतौ॥ समारोप्यग्निगमिष्यामपि नतुभ्यंतादित्याहुः॥ सर्वप्रायश्चित्तांतं पूर्ववत्॥ पाल्यसमारोपे यजमानएवनान्येऽतिसर्वसंमतं॥ अरणीसमारोपेपि यजमानएवे १७

तिवृत्तिकृत॥ यजमानेऽसन्निहितेमहोपवासत्नीअग्नीनादायगच्छेत्॥ जायापत्योराहिताग्नेर्विज्ञायतेऽर्धंवाएषआत्मनोयत्पत्नीचेत्यपिचयदिप्रवसतियजमानेपत्न्याःप्रवासनिमित्तंस्यादितिबौधायनसूत्रं॥ पूर्वोक्तनिमित्तवज्ञात्पत्न्याअपिप्रवासत्राप्तौपूर्वोक्तोविधिर्भवतीति॥ पा
न र्णाग्नितपनारणीसमारोपंविनातुबौधायनोक्तः॥ कश्चिदत्यंतापरिभाष्यस्मादरणीसमारोपोपिसर्वत॥ अन्याधानेयएवयदेवतामपहायान्यामेवोद्दिश्ययतितदाधेयोयंद्वेदेवातिपातयानीतिस्रुवाहुतिंजु

१८ क्रुयात॥तदाहुर्गोपालः॥सर्वत्र देवता शब्देय एमामपहायच॥अयएव्यो व
देत्तत्रय द्वोदेवास्तुवाकृतिरिति॥अयमर्थः॥अयएव्य देवता शब्दोच्चारणा
नंतरं पुनर्यएव्यदेवता शब्दमुच्चार्यप्रक्रांतंनिर्वर्त्य॥यद्वोदेवातिपातया
निवाचाचप्रयुतीदेवहेलनं॥अरायोअस्मॉअभिदुछुनायतेन्यत्रास्मि
न्मरुत्सन्निधेतनस्याहा॥देवेभ्योमरुद्भ्यइति॥आश्वलायनकारिकायां
तु॥स्रुक्मोदेवतानांतुसंकल्पादोषवेद्यदि॥इध्मार्थांस्रुक्मस्तद्वो
मार्हेतुभवेद्यदि॥मध्यात्सर्वार्थंतश्चेतिस्रुक्मोस्यभवेद्यदि॥इध्मा १८

र्थांस्रुक्मःस्याच्चेत्तथानिर्वपणादिषु॥यद्वोदेवाश्चाब्रह्मान्नुक्रुयात्तुस्रुवा
कृतिं॥तस्मैयजमानोमुख्यंधनंदद्यात्तु॥सर्वत्रचाग्निहोत्रादिदर्वीकूर्चप
वित्रकः॥प्रस्तरःपरिधिर्बर्हिर्विधर्तीचोपवेषकः॥वेदश्चैतादृशांनाश्रौ
धानेयेचचोदिताः॥दुष्टान्नातांश्चसंभारान्वर्जयित्वाप्रवर्ग्यञ्जानु॥तेषांछे
देचदाहेचसर्वांसवेविनाशने॥मूत्रविट्रक्तश्रुक्चेरुपघातेचतत्
त्यजेत॥तज्ज्ञातीयंचतद्रूपंतत्परीमाणमेवच॥अन्यत्कृत्वायथापूर्वं
यथास्थानंनिवेश्यच॥स्रुवेणाज्याहुत्यादग्ध्वांत्वमग्नेचप्रजापते॥पवि

त्रेणारक्षपवित्रे॥ अन्वाधानोत्तरं सूर्यग्रहणेस्रुवाकुतीर्जुहुयात्॥ उद्वयमुदुत्यंचित्र
१५ मितिकृत्वासूर्यायेदमितित्यागः॥ प्रयोगपारिजाते संग्रहः॥ अन्वाधानेष्टिमध्ये
चेद्ग्रहणंचंद्रसूर्ययोः॥ नवोनवोयमादित्याग्निंत्रंचोदुत्यमुद्वयमिति॥ चंद्रग्रहणे॥
नवोभवति॰मायुःस्वाहा॥ यमादित्याअंशुमाप्याययंतियमक्षितमक्षितयः
पिबंति॥ तेननोराजावरुणोवृहस्पतिराप्याययंतुसुवनस्यसोमाःस्वाहा॥उ
पयत्रंचंद्रमसदे॰॥ यदिमेघादिनारविर्नाविर्भवतिउद्वयंउदुत्यंचित्रेमिति
स्रुवाकुतीर्जुहुयात्॥ इदमेकाधानादिसर्वकर्मस्वपिज्ञेयं॥ अथयजमानस्य १५

दर्शपूर्णमासयोस्तंत्रेप्रक्रांतेदुःखेनाश्रपतनेव्रतार्थं तेष्टिःपूर्णाहुतिर्वा॥
नधूमादिना॥ अन्वाधानोत्तरंयजमानस्यवरणोत्तरमृत्विजांचाबुद्धिपूर्वंरेतः
पातेइमंमेवरुणतत्त्वायामीति॥ बुद्धिपूर्वंतुयजमानस्यत्रानपत्नी॥ ऋत्विजांच
कामकारेपिपूर्वोक्तैरेवाहुती इतिचंद्रिकायां॥ स्वप्नेरेतोविसर्गेपिपूर्वोक्तैरेवाहु
ती कर्मपाटुष्म्यायपुरुषसंस्कारार्थंतुजपःपुनर्मामेत्विंद्रियमित्यनुवाकस्य
॥ सयथा॥ पुनर्मामेत्विंद्रियं॥ पुनरायुःपुनर्भगः॥ पुनर्ब्रह्माणमेतुमां॥ पुन
र्ब्रह्मविणमेतुमां॥ यन्मेरेतःपृथिवीमस्कान्॥ यदोषधीरप्यसरद्यदापः॥ इदं

२०

तस्तुनराधेहि॥दीर्घायुत्वायवर्चसे।यन्मेरेतःप्रसिच्यते।यन्मआजायतेपुनः॥
तेनमामस्तंकुरु।तेनमासुप्रजंकुर्वितिमाधवीये प्रजापतिः॥अथेरोगे तथा
स्वप्नेसित्काभ्युक्षमकामतः॥आदित्यमर्चयित्वातु पुनर्मामेत्यृचंजपेदिति॥प्रा
यश्चित्तप्रदीपेतुपुनर्मामेत्यचास्रुवाकृतिः समिद्धोमोवेति॥कश्यपस्तु॥सूर्य
म्यत्रिनेमस्कारंस्वप्नेसित्काग्रहाचरेदिति॥गंधपुष्पोपहाराद्यैःसूर्यमभ्य
र्च्यस्रुवाकृतिरितिप्रदीपे॥याज्ञवल्क्यस्तु॥यन्मेरेतइतिद्वाभ्यांरक्तेरेतोभि
मंत्रयेत॥स्नानोत्तरंधेनुवोर्मध्येतेनानाभिकयास्पृशेदिति॥यन्मेपुन॰ २०

आभ्यामनाभिकयारेतआदायधेनुवोर्मध्यमुपस्पृशेदितिमाधवः॥पराशरः॥
गृहस्थःकामतःकुर्यादेतत्सर्वत्रभूपति॥सहस्रंतुजपेद्व्याःप्राणायामैःसह
स्रभिरितिं॥पितृयोनौरेतःसिक्तात्रतभरतेष्वामृगारेत्याचयजेदितिबोधाय
नः॥यदुःस्वदारगमनेव्रातपतीसोयमाहिताग्निरुपवसथीयेहंपुरस्तात्वा नि
तरग्निहोत्रात्पिरय्यानुपसादयेदनुव्रताभान्त्रतोपायनीयंयाचयीततस्याःसि
नीभवतःबर्हिषाघृणामासेव्रतमुपैतिवत्सेरमावास्यायांसर्षिर्मिश्रंदधिमि
श्रंवाश्नागःतत्रयत्रुषिस्तेसर्वमेवेतदहःकोशीधान्यंवर्जयेदन्यत्रेति
तेम्सस्यव्रात्यत्वेप्रतिपायाश्नीयान्नेश्वरोयोछिष्टंदद्यात्यत्यागेवेतदहरु

२१ छिद्रं दधान्नासंघोत्रायीतनस्त्रियमुपेयादूरात्कोपिव्रतचारीत्वेवस्यादितिकर्मो
तस्त्रेव्रततोपेव्रातपतीष्टिकुर्यात्पूर्णाहुतिंवा॥ ॥इध्माबर्हिषोन्यूनाति
रेक्तस्रुवाहुतिंजुहुयात्॥अधिकेत्याज्येन्यूनंसंपाद्यंसंभाविनःसं
स्कारास्तत्रकर्त्तव्याः॥मंत्रेणोपरिरुद्धापितंन्नास्रुवेध्माबर्हिरादियद्यधस्तात्प
तेत्तदा॥ब्रह्मप्रतिष्ठामनसोब्रह्मवाचोब्रह्मयज्ञानाꣳहविषामाज्यस्य॥
अतिरिक्तेकर्मणोयज्ञेहीनेयज्ञःपर्वाप्रतिरन्तेतिकल्पयन्स्वाहाकृताहु
तिरेतुदेवानितिमंत्रेणापूर्वंवत्संस्थाप्याज्यंसंस्कृत्यस्रुवंसंमृज्यतेनेवमं २१

त्रेणस्वाहाकारांतेनाहवनीयेस्रुवाहुतिंजुहुयात्॥यत्तायत्रयाणहुतं।आज्यस्था
आज्येनाज्यभागानंतरंवाहुत्वाधिश्रुस्मरेत्॥अथसान्नाय्यंदुष्ट्वेत्सायश्चित्तं॥
केशानखकीटपतंगैरन्यैर्वाविभत्सैर्व्यापन्नैस्तिलंवासान्नाय्यंप्रजापतेनन्व
देतान्यन्यइत्यृचास्यांतमामध्यमेनपलाशपर्णेनवल्मीकवपायांवातूष्णी
मनुवाप्रक्षिपेत्॥वीभत्सैरेतावतेवसिद्धेकेशादीनांपृथक्करणंस्मृत्युक्त
मुध्यंतरनिवृत्त्यर्थंइतिवृत्तिकृत्॥सर्वर्त्विःसाधारणमेतत्॥विस्रंदमानंसा
नाय्यंमहीद्योःपृथिवीचनइत्येतःपरिधिदेशेनिनयेत्॥अत्रायंविवेकः॥

२२ विष्यदनंद्विविधं॥सिक्तमसिक्तंच॥यत्तुकुंभ्यामेवबहिर्निर्गम मात्रेणकुंभ्योवि
ष्यदतेनाग्निंभ्रमिंवाप्नोतितदसिक्तमदुष्टंच॥यद्विष्यदमानंकुंभीमतीत्या
ग्निंभ्रमिंवाप्नुयात्तत्सिक्तंदुष्टंतत्रयद्दुष्टंतस्येयंप्रतिपत्तिः॥दुष्टंतुसान्ना
य्यंपूर्वोक्तप्रकारेणपत्नीसंयाजांतेपरिधिदेशेनिनयेत्॥अदुष्टंतु
कुंभ्यामेवप्रविश्योदित्यर्थोनक्षिप्तं॥देशप्रदानंतुपरिध्यभावेपितन्मात्रप्र
योगार्थं॥एवंप्रातर्दोहेपित्रेयं॥सायंदोहेदुष्टेप्रातर्दोहंव्यासिच्यप्रचरेयुःम
ित्यर्थः॥प्रातर्दोहमात्रनाशेतद्दैवत्यमेकादशकपालंपुरोडाशंतत्स्था २२
=प्रातर्दोहंद्वयोःपात्रयोःकृत्वाऽन्यतरद्धविर्भावायातं चप्रचरेयु=१

नेनियोज्यदर्भासहप्रचरेत्॥उभयोरपिदोषेरिंद्राग्नेपंचशरावमोदनंनिर्वपेत्
॥तयोःपृथक्प्रचर्या॥हविरुत्तरोसहइष्टयोरैंद्राग्न्योःप्रचारकालेतस्मादेव
हविषस्तयोरिंद्राग्न्योःपृथगेवयागःकर्त्तव्यइत्यर्थः॥तत्राप्यग्निंदेवतानांप्रथ
मंयजेदितिश्रुतेरग्निमिष्टिंदृयजेत्॥इंद्रमेवेत्येके॥केचिदाचार्याःनिर्वापाद्यो
सादनांतमिंद्रोद्देश्यकमेवपंचशरावमोदनंकृत्वाप्रचारकालेऽग्नेरिंद्र
स्यचपृथक्प्रचारमाहुः॥यस्योभयंहविरात्तिमार्छेदिंद्रंपंचशरावमोदनंनि
र्वपेत्॥अग्निंदेवतानांप्रथमंयजेदितिश्रुतेः॥अग्नियागश्रुतेरनुवादत्वेना

२३ पिसंभरात॥ यथानिरुक्तमिंद्रायैवयव्यमिति केचित्॥ तन्नमन्यतेऽनुवादवै
यर्थ्यात्॥ होत्रा लोकेतुओदनंद्विःकृत्वाप्रचरेदितिविज्ञेषः॥ वत्सानांपानेनु धा
वायवेयवाग्युनिरुप्यतयायजेत॥ यवाग्वायागंकृत्वापुनर्यागःकर्त्तव्यइति
वृत्तिकृत्॥ इदंचप्रायश्चित्तमज्ञेषपाने॥ सज्ञेषेतुनयवाग्वः किंतुसर्वप्रा
यश्चित्तंकृत्वाज्ञेषेणयागः॥ अत्रवोधायनानुसारीप्रयोगः॥ सौर्य्यार्थेष ना
ट्गावः तासांपयोदोहनात्साग्यदिवत्साधयेयुस्तासांस्वल्पमपिपयोन
लभ्यतेतदानीमेववायुदेवत्ययायवाग्वायजेत॥ इष्ट्वायक्ष्यइतिसंकल्पः॥ २३

ओं

अन्वाहितत्यान्नान्याधानंबर्हिःसंभरणमिध्मसंभरणंचरुस्थालीमेक्षणंच॥
कपालदृषदुपलामेक्षणाधिष्ण्यदर्वीवर्ज्यान्यन्यानिपात्राणि॥ वायवेजु
ष्टंनिर्वपामीतिनंदुलान्निरुप्योषधिधर्मेणावघातांस्तेकृत्वाचरुस्थालीमधि
श्रित्यतंदुलैर्यावद्भूपक्वाइध्माधानाद्याज्यभागौतेकृत्वा॥ सत्वंनोदेवमनसा
वा॥ रुधिवाजोन्त्रपोधियःइयेऽहवायुंद्युम्नायप्रदुतिंयस्तआनहुचिंसो॰॥रु
पोषितेऽस्याऽवोऽ॰॥ रत्नभागिमनुमंत्रयेत॥ व्रतानांव्रतिसर्गेनियजमानस्य
॥ पुनरालंभवर्जंसमाप्य॥ तदानीमेवान्यासांपयोदुग्ध्वासायंदोहंसंपाद्य

२४ सर्वे प्रायश्चित्तं कृत्वा सर्वोच्छिष्टान्पात्रकृत्यश्चोभृते प्रातर्दोहाय सर्वोसांपयोहो
हृयित्वादर्शेष्टिमविकृतां समापयेत्॥ प्रातर्दोहार्थमपिअपाकृत्वा वत्सायदिध
येयुस्तदाप्येतदेव प्रायश्चित्तमितिचेष्टिकायां॥ सर्वत्रप्रधानपर्याप्तपयसःला
भेन प्रायश्चित्तं॥ सान्नाय्यमभिघार्यं चेत्॥ मित्रौजनान्याहवनीयेकृत्वान्यां
दुग्धापुनःसन्नयेत्॥ पूतिगंधेनदुष्टे चेत्तदाप्युत्क्षिप्यपुनःसन्नयेत्॥ सा
न्नाय्यस्यपुरोक्तमन्त्रयाज्ञात्स्कंदनेयजमानःसंत्वासिंचामियजुषेत्येते
नस्कन्नस्योपरिजलेक्षिप्ताभिमंत्रयेत्॥ अध्वर्युर्भूपतयेस्वाहेत्यादिनास्कं २४
न्नमभिमन्त्र्यदुर्गादिगणेनजुहुयात्॥ ततःस्कन्नशेषमात्रेणप्रचरेत्॥

सर्वस्कंदनेलौकिकं दधिपयोवानीयदोहमेत्रान्नपित्वादुर्गादिगणंकृत्वातेन
प्रचरेत्॥ अमावास्यायांसायमग्निहोत्रंकृत्वासान्नाय्यानंचनार्थेअग्निहो
त्रोक्तोपकरणंनिदध्यात्॥ तन्नाशेपुनरग्निहोत्रंकृत्वातच्छेषाणांतंत्र्यात्॥ ॥इ
तिबौधायनीयेसान्नाय्येदुष्टे प्रायश्चित्तं॥ ॥अथान्वाधानेकृतेअमावास्या
यांपुरस्ताच्चंद्रदर्शनेप्रायश्चित्तमाहाऽचार्यः॥ सान्नाय्येपुरस्ताच्चंद्रमसाभ्यु
दितेऽग्निर्दीतंद्रःप्रदानाविच्छुःस्त्रिपिविष्टइति॥ अस्यायमर्थः॥ सान्नाय्ये
सामान्यद्रव्यकेऽमावास्येकर्मणिअन्वाधानेप्रारब्धेसतिभ्यःपुरस्तात्

२५ यदि चंद्रमाभ्युदितो दृश्यते तदेनामभिघिं कुर्यात्॥ इत्यर्थः॥ अस्यामावास्याविकारत्वात्॥ प्रायश्चित्तेऽपित्वेन प्राप्तानामुपांशुत्वं। वाज्यघाज्यभागत्वानुरूपाधर्मानभवंति॥ ॥अथास्याः प्रयोगः॥ आरभ्येदर्शकर्मणि चंद्रदर्शननिमित्तेऽभ्युदितेष्ट्या यक्ष्य इति संकल्पः॥ अग्निर्दाता। इंद्रः प्रदाता। विष्णुःशिपिविष्ट इति प्रधानदेवताः। व्रीहीनवहत्य तंडुलांस्त्रेधाविभजेत्॥ ये मध्यमास्तंडुलास्तानग्नयेदात्रेनिरूप्याष्टाकपालंपुरोडाशंकुर्यात्॥ येस्थविष्ठास्तानिंद्रायप्रदात्रेचरुं। येकनिष्ठास्तान्विष्णवेशिपिविष्टायचरुं॥ प २५

थमचरुस्थालीमधिश्रित्यतत्रसायंदोहंदध्यानीयतंडुलानोप्यइंद्रायप्रदात्रेदधनिचरुंश्रपयेत्॥ द्वितीयचरुस्थालीमधिश्रित्यप्रातर्दोहंतस्यामानीयतंडुलानोप्य। विष्णवेशिपिविष्टायचरुंश्रपयेदितिविशेषः॥ वधन्वंतावाज्यभागौ। प्रधानस्य॥ अग्नेदाद्युषेरयिंवीरवंतंपरीणसं॥

ॐ शिक्षीहिनःसनुमतोऽयेऽग्निंदातारंसयं तावित्र एषांसंयज्ञानामधाहिषः॥ अग्निंतंवोदुवस्यतदातायोवनितामघोऽवोऽग्नेर्दातुरहमन्नादः॥ दीर्घस्तेअस्त्वंकुशोयेनावसुप्रयछसि॥यजमानायसुन्वते॥ ॐ

LIBRARY OF THE SCHOOL OF ORIENTAL STUDIES

२६ येऽ३॰ इंद्रंप्रदातारंभद्रातेहस्तासुहोतोनपाणीप्रयेतारास्रुचतेराधइंद्र॥का
तेनिषत्तिःकिमुनोममस्तिकिन्नोदुहुर्षसेदातवाजेवो३॰ इंद्रस्यप्रदातुरहं॰
येंद्रियावीर्यामं। वषट्तेविष्णवासञ्चाकृणोमितन्मेजुषस्वशिपिविष्टहव्यं॥ वर्द्धंतुत्वासुष्टुतयोगिरोमेयूयंपातस्वस्तिभिःसदानः३ येऽ॰ हेविष्णुशिपिविष्टप्रनंतेऽद्यशिपिविष्टनामार्यःसंसामिवयुनानिविद्वान्॥तेत्वाऽहंतमिवसमतेष्वास्थयंतमस्यरजसःपराका३ दवो३॰ विष्णोःशिपिविष्टस्याहमन्नादः॥पुनरास्रुंभवर्जसंतिष्ठते॥ततस्तेषोग्निष्टुत्प्रक्रांतामि २६

ष्टिंसमापयेत्॥यद्वाचतुर्दश्यांप्रक्रांतामिष्टिंकुर्यात्। यद्वाचतुर्दशीपंचदश्यौ
चदयमुपवसथंकृत्वाचतुर्दश्यांपंचदश्यांवासायंदोहंकृत्वाश्वोभूतेप्र
तिपदिप्रातर्दोहंकृत्वायजेत॥असोमयाजिनःसान्नाय्याभाग्रात्॥चरुर्द्व
यमक्षुकार्यं।समम्न्यत॥इत्यभ्युदितेष्टिः॥सर्वत्रवितते कर्मणियदिजन्यं
क्षयमापद्येत॥यतइंद्रभयामहेततोनोऽभयंकृधि।मघवञ्छग्धितेव
तन्नऊतिभिर्विद्विषोविमृधोजहि॥स्वस्तिदाविशस्पतिर्वृत्रहाविमृधोवशी
। वृषेंद्रःपुरएतुनःसोमपाऽभयंकरइतिस्तुवाकुती॥प्रजापतिर्विश्वके

२७ मितिचस्रुवाकृतिंकुर्यात्॥अथापगमेपुनर्यजेत्। यजमानःयाजमानमंत्रोच्चा
रणकालेस्वराद्यित्रेपेऽग्नेअभिर्गीर्भिरितिस्रुवाकृतिंजुहोति॥अग्नेअभिर्गीर्भिर्य
दतोनऊनमाप्याययहरिवोवर्द्धमानः॥यदास्तोत्भ्योमहिगोत्रारुजासिभू
यिष्ठभाजोऽधतेस्यामस्वाहा॥इंद्रायहरिवतेवर्धमानायेदं॰॥अथयदि
पवित्रेनश्येदग्नयेपवित्रवतेपुरोळाशंनिर्वपेत्॥पवित्रंते
वितंतंब्रह्मणस्पतेप्रभुर्गात्राणिपर्येषिविश्वतः॥अतप्ततनूर्नतदामो
ऽश्नुतेश्रुतासरद्दृतंतत्समाशत॰३ये३॰हेऽग्निपवित्रवंतंत २७

पोष्यवित्रंवितंतंदिवस्पदेशोचंतोअस्यतंतवोव्यस्थिरन्॥अयंत्स्यस्यपवी
तारमाशवोदिवस्पृष्ठमधितिष्ठंतिचेतसाऽयो३॰अग्नेःपवित्रयतोरमन्वा त
दः॥पूर्णाकृतिर्वा॥अग्नयेपवित्रवतेस्वाहेति॥अथप्रणीतानांचेत्स्कंदनेसं प्रोक्षणीनां
स्रावेवाऽध्वर्युरापोहिष्ठेतितिसृभिरावृत्य॥ततंमेऽपस्तदुतायतेपुनःस्वा
रिष्टाधीतिरुचथायशस्यते॥अयंसमुद्रउतविश्वमेपुनःस्वाहाकृत
स्यसमुत्पृणतर्तुभिःस्वाहा॥ऋभुभ्येदं॰॥इतिस्रुवाकृतिंजुहोति॥युक्ता
मेणिनीपेऽग्नाश्चेत्तायनोक्त्वाब्रह्माजोचाच्यस्रुवाकृतिंजुहुयात्॥य

२८ हो॰देवा॰तनस्वाहा॥देवेभ्योमरुद्भ्यश्च॰ततोविछुस्मरेयं॥ततोयजमानोः
स्मैगृहेप्रधानभूतंद्रव्यंदद्यात्॥अथ आग्नेयदेवतायेनिरूप्यप्रोक्षणादि
घ्वाग्नीमुख्यकर्मप्रवृत्तोऽउत्तमप्रयाजात्प्राक्स्मरणेपूर्ववद्देवयद्यो
देवेतिस्रुवाहुतिंहुत्वातेनैवद्रव्येणाग्नेयेजुहुयात्॥उत्तमप्रयाजानंत
रंस्मरणेतुपुनःश्रपोदानादिविस्मृतायेआग्नेयेनिरूप्यहविरासादनो
त्तंकृत्वातस्मिन्नेवतंत्रेक्रमेणोभयप्रचारः॥अग्नेयेनिरूप्यतद्वा
नीमेवाग्नेयाःस्मृतोपूर्वंनिरूपितंद्रव्यंअमुष्मैत्वेतिअग्नेयीनाम्ना २८

स्रु अग्नयेमुष्मैस्वाहेतिचतुर्थ्यंततन्नाम्नासर्वमारुवनीयेजुहुयात्॥ततोय
द्यो॰देवात्वंनोअग्नेसत्वंनोअग्नइतिवाहुतीर्जुहुयात्॥विछुस्मृत्वा॥पुनर्वा
ग्नेयेनिर्वपेत्॥इदमासादनात्प्राक्॥आसादनोत्तरंस्मरणेतुविस्मृतदेव
तायेश्रपोदानादिनिरूप्यक्रमेणोभयोर्योगः॥ततोमिदाहुतीर्जुहुयात्॥
यन्मआत्मनोमिदाहृदग्निरत्स्वनराराजीतवेदाविचर्षणिःस्वाहा॥अग्न
येजातवेदसश्च॰॥पुनरग्निश्चक्षुरदात्सुनीरंद्रोवृहस्पतिः॥पुनर्मआग्नि
नायुवंचक्षुराधत्तमक्ष्योःस्वाहा॥अग्नीद्रवृहस्पत्यश्विभ्यश्च॰॥ततोव्या

२५ हुतिभिर्होमः॥ हविषिनिरूप्यचक्रीयक्षुपुरुषोवाविकारमंतरियात॥ तदर्थे
नपथाव्यवायोज्ञानस्तेनपथागंनीत्वागार्हपत्याहवनीयपर्यंतंभस्मलेखा
मुदकधारांचतंतुंतन्वन्निर्तिमंत्रावृत्यासंतनुयात॥ ततस्तमाहवनीयमुद्वा
ष्यदर्शपूर्वमितिपुनःप्रणीयत्वमग्नेसप्रथाअसीत्यपनिष्टते॥ ततस्त
देवतेचमुपजी व्यश्रपीदानादिपाधिकृतिंकुर्यात्॥ एतद्विनिर्वापा
दूर्ध्वंसमिष्टयजुषःपूर्वंव्यवायेसमिष्टयजुषऊर्ध्वंचेन्नदैवगवातिक
मणादिउपरुच्छानांतंकृत्वातत्कर्मसमाप्यतेघेवाग्निषुअन्वाधानादिपा २५

धिकृतिंकुर्यात॥ एतत्त्वनग्निनाव्यवायेअग्निव्यवायेतुपाधिकृत्यैवकार्या॥ नग
वातिक्रमणादीत्यर्थः॥ श्वगमनेविशेषःपूर्ववत॥ इत्याचार्यमतं॥ बोधायनस्तु॥क
र्ममध्येदर्शपूर्णमासौचतुष्पदानांमार्जारादीनांअग्निमध्येऋत्विगग्निमध्येवागमने
अध्वर्युर्जुह्वांदक्षाग्रहीतेनमिश्रादिगलेनजुहुयात॥ इदमेवऋत्विजांमध्ये
पत्नीयजमानयोर्मध्येवागमनेप्रत्यै॥ व्यापन्नानिहवींषिकेशनखकीटपतंगे षि
रन्येवाक्षीभत्सेष्वग्निकानिचापोभ्यवहरेयुरित्याचार्यः॥ अन्येरिति॥
अभ्यवहरन्तिनानीतमक्षिकागवामंगेषुवर्तिन्यातिकाःतन्यवनीमलकृणः॥

३०

चेलक्षिशोवर्त्तिनीयूका। मलपिंडकरःकीटः। श्वमार्जारनकुलमर्कटाःप्रसि
द्धाः। घोंक्षःकाकः। आखुर्मूषकः। तेषांअन्येषांचपुरीषंकेशाःशरीराद्वियुक्ताः
॥ सिकःपरिहितवसनोचलः। पदंपादः। मृतनरवः देहच्युतनरवः। कुनरवोदु
ष्ट नरवः पूरुषः। प्रतिदुष्टगंधः। दूषःसुरवजोविद्रुषः। स्वेदोघर्मः। असृ
क्रुधिरं। स्नेहोनासिकाप्रसः। अश्रुनयनोबु। कासःश्लेष्मा। क्षुत्क्षुतं। एते
रुपहतं। वसामज्जमस्थ्यज्जामूत्रविट्कर्णविट्नरवाः। श्लेष्माश्रुदूषिका
स्वेदोद्वादशैतेनरयांमलाइत्येतेश्वोपहतं। रजस्वलास्तिकाभ्यांचदृष्टं॥ ३०

स्पृष्टं च। अप्रयतेनाशुचिनादृष्टं स्पृष्टं। भ्रूणघ्नेनवादृष्टंस्पृष्टंच। स्त्रियुर्वेज्ञा
गर्भिणीचब्राह्मणोन्यपरत्यमीपंचभ्रूणाः। एतेषामन्यतमंयोहंति सभ्रूण
घ्नः॥ अपात्रेणग्राम चांडालादिनादृष्टं स्पृष्टंच॥ ध्वजीचरजकश्चैवस्तोद
कारः शुनोधिपः॥ तक्षकोवागुरीचेतिग्रामचांडालकास्मृताः॥ अमेध्य दे
शोवास्कन्नं। यत्रप्रसूयतेनारीम्रियतेदह्यतेपिच॥ चंडालाध्युषितंयत्र
मत्रविष्टादिसंगतिः॥ एवंकल्मषभूयिष्ठाभूरमेध्याप्रकीर्तिता॥ एवंभू
तामेध्यदेशेस्कंनंचदुष्टंहविरप्रुप्रक्षिप्यमिंदाकुतीच्याहुतीश्चजु

३१ त्याश्रपोशनादि ना हविरंतरमुत्पाद्य यजेतेति बौधायनः॥ बीमत्सेत्यि
ना वतैव कार्यसिद्धे केशादीनांपृथक्कृत्यहणं केशादिव्यापत्तौस्मृत्युक्ता शु
द्धिर्हविष्युनेतिज्ञापनार्थमिति वत्तिकृत्॥ अच्युतकेशसंसर्गोनदोषायेतिच
॥तत्रायंक्रमः॥व्यापन्नंहविरप्रुप्रक्षिप्यश्रपयातश्रतुर्गृहीत्वाव्यापन्नह
विष्कंदेवतांतत्स्थानेयजेत॥अव्यापन्नेहविर्भिर्यथाप्रवंसमापयेत्॥त
तोव्यापन्नहविर्मात्रदेवतांश्रपयित्वाधानादिनायजेत॥एवंद्योर्बहूनां
व्यापत्तौज्ञेयं॥होत्रालोकेतुसर्वेषांव्यापत्तौश्राज्येनेष्टिंसमाप्यपुनरिज्या॥ ३१

यदान्यतरव्यापत्तिस्तदातस्मिन्नेवकालेध्वर्युर्जुहूंसरुद्दादशगृही
तेनमिंदाजुनीमनस्वतीचरुत्वाध्रौवाज्येनप्रचरेदिति॥प्रधानयागोनरं
व्यापत्तौतुप्रधानस्यज्ञातत्वात्॥शेषकार्योणामप्रयोजकत्वाच्चतत्कार्य
माज्येनकर्त्तव्यंके पांचिल्लोपस्तव॥इदंसर्वंश्रावाद नादर्धप्रधानया
गादर्वाक्विव्यापत्तौद्रष्टव्यं॥हविषांव्यापत्तावेवंद्वासुदेवतास्वाज्येनेष्टिं
समाप्यपुनरिज्येतिभगवदाश्वलायनोक्तः॥प्रागेवाहुनाच्चदोषेनिर्वा
पणोर्ध्वंमायाहुनात्प्राक्कृविर्व्यापत्तौचाज्येनेष्टिंसमाप्येत्यादि॥निर्वा

पादिपिष्टकरणांतं तंडुलादिद्वयेऽाज्ये चोपहतौ प्रक्षालनादिनाशुद्धिः॥ चाकादूर्ध्वं चरुश्चोपहतौ मोक्षणाच्छुद्धिः॥ अत्यंतोपहतौतत्तत्तेपरित्यज्यभूयादानादिपुनःप्रयत्नेयेत्॥ याया व्यापत्तिरुक्तासासाप्रधानहविषां॥ अत्यंतंगुणभूतानां॥ गुणभूतानांऽअत्यंतंऽआपरिसमाप्तेःपुनरावृत्तिरेव॥ अयमर्थः॥ प्रयाजार्थंजुह्वांचतुर्गृहीतस्याज्यस्यस्रुचिगृहीत्वायज्ञेसर्वत्रायश्चित्तंकुर्यात्॥ एवमोष्टतानांप्रयाजेभ्यःपूर्वंचज्योतिस्तुतिऽआघारंप्रयाजोत्तरंचेदन्यायाज्यार्थंचतुर्गृहीतं यजमानःसुचीर्यायत्ते ३२

तिऽॐ वाज्यस्यासमिष्टहोमादर्वाक्स्विष्टकृत्काले प्रधानहविर्होमेतुनपुनरावृत्तिः॥ तदुक्तं॥ प्राक्स्विष्टकृतउक्तंप्रधानभूतानामिति॥ हविषांस्कन्नमक्षिप्तंहोतृ॥ देवान्जनमगन्यज्ञस्तस्यमात्रीरवतुवर्धनं॥ भूतिर्घृतेनमुंचतुयज्ञंयज्ञपतिंमहः॥ भूपतयेस्वाहाभुवनपतयेस्वाहाभूतानांपतयेस्वाहायज्ञस्यत्वाप्रमयोन्मयाक्षिमयाप्रतिमयादृक्षऽस्कंदेति॥ आकृतिपरिमाणंऽस्यनस्कंदनेनेनत्॥ सर्वस्कंदनेपुनरुत्पत्तिः॥ सर्वप्रायश्चित्तेच॥ तंडुलप्रक्षालनस्यवेद्यांनिनयनात्पूर्वंपचारेपुनःकृत्यानिनयेदितिवि

३३ रारण्यः॥ ततः सर्वेप्रायश्चित्तं॥ ॥अथ कपालसंबद्धप्रायश्चित्तं॥ ॥कपा
लप्रमाणमाहगोपालः॥ ॥तुरंगखुरविस्तारं द्व्यंगुलोर्ध्वप्रमाणकं॥ क
पालचयनंविद्याद्रथचक्रंतथाकृतिः॥ संख्यानेदेकपालानांवह्निहोमो
विधीयतः॥अनतिप्रथनेतेषांअतिप्रथनकेतथा॥असंहतेषुप्रथनेजुहुया
द्घाहुतीःसकृत्॥हीनसंख्यान्यदायत्रैघामाद्यंपूर्ववत्॥श्रुंधस्वेतिप्रो
क्षणीभिःप्रोक्ष्यशाम्यंयोपहत्यासादयेत्॥आधिक्येतुनदुत्सृजेत्॥अ
संहत्यासादनेचाग्नाहुतिहोमः॥ कपालंभिन्नमनपवृत्तकर्मगामग्नात्वाशा ३३

त्राक्षरयासंदधामीतिसंधायापोभ्यवहरेयुः॥अभिन्नोघर्मोजीरदानुर्यतआर्त्त
स्तदगन्मनः॥इध्मोवेदिःपरिधयश्चसर्वेयत्तस्यायुरनुसंतरंतु॥त्रयस्त्रिंशा
त्तंतवोयान्वितन्वतइमंयज्ञंस्वधयायेयजंते॥तेभिःछिद्रंप्रतिदध्मोयज्ञस्या
यज्ञोअप्येतुदेवानिति॥अनपवृत्तवचनात्पुरोडाशश्चपणाद्घर्मेनप्राय
श्चित्तमितिवृत्तिकृत्॥पुरोडाशश्चपणोर्धमपिग्राह्यासनान्नोपिवैश्वान
रीपूर्णाहुतिंवाकुर्यादित्यन्ये॥एवमवलीढाभिक्षितेषु॥अवलीढानिश्वा
दिभिः॥अभिक्षितानितद्वत्नादिभिः॥अशुचिप्रदेशेपतितानिपूर्ववद

३४ योऽभ्य वहरेयुः॥ नात्रसंधानंनतन्मंत्राश्चभेदाभावात्॥ एवमन्यान्यपिमन्म
यानिपात्राण्यजानप्रयोजनानिभिन्नानिव्यापन्नानिवाभूमिर्भूमिमित्यनुप्र
क्षिप्यसर्वंप्रायश्चित्तंकृत्वान्यत्प्रयोजयेत्॥ एवंदारुमयानांकाकाद्युपहतौ
नक्षणमुच्छोदकेनक्षालनमित्यादिस्मार्त्तंप्रायश्चित्तं॥ अमेध्यादिभिरन्यै
तोपहतौत्यागइतिभावः॥ नवीनेनियोजनेसर्वंप्रायश्चित्तं॥ स्रुग्भेदेतु
ब्राह्मणे॥ यदिस्रुग्भिद्येतकातत्रप्रायश्चित्तमित्यन्यांस्रुचमाहृत्यजुहुया
दथैतांस्रुचंभिन्नामाहवनीयेभ्यादध्यात्प्राग्दंडात्प्रत्यक्पुष्करात्सातत्रप्रा ३४

यश्चित्तमिति॥ बोधायनीयानांतुयस्मिन्कस्मिंश्चित्पात्रेभिन्नेतत्स्थानेन्यंनजुहोती
यंनस्मदग्नीनिधायेत्सरायुर्मेधारयतेतिपूर्वोक्तमंत्रेणतदभिमंत्र्यस्रुचिचतुर्गृ
हीतंगृहीत्वादुर्गादिगतेनजुहुयात्॥ पुनस्तथैवगृहीत्वामित्रादिगतेनजुहु
भूमिर्भूमिमगादित्यनेनभिन्नंपात्रमाहवनीयेप्रहरेदिति॥ चंद्रिकायांतु॥ ॥
पात्रमध्येद्वयेविद्यमानएवेदंप्रायश्चित्तं॥ केवलपात्रभेदेतुनाभिमंत्रणं॥
भिन्नेभूमिर्भूमिमगादित्याहवनीयेप्रास्यदुर्गागतेनमित्रादागतेनचजुहुया
दिति॥ ॥ कपालोपधानेतदुपरिनिहितांगारे पुरोडाशोपधानात्पूर्वमनु

३५ गते तदानीमेवाज्यं संस्कृत्य सर्वं प्रायश्चित्तं जुहुयात्॥ अज्यमसीत्यादिमंत्रेषु
एकश्यामभंगे वेष्टयवीज्ञपः॥ व्याहृतय इति केचित्॥ जोहवीपश्चाज्ययोर्वि
पर्यासे यद्वो देवेति हुत्वा मुख्यं धनं दद्यात्॥ चरोश्चाप्यमाणे तापादुत्तिष्ठेत्प्रा
कूदिशि॰ अग्नयेस्वाहेति दक्षिणे यमायस्वाहा पश्चिमे वरुणायस्वाहोत्तरे
सोमायस्वाहा विदिक्षु व्याहृतिभिः॥ सर्वत्र चेत्सर्वाहुतिभिर्जुहुयात्॥ उत्ति
ष्ठंश्च समाज्येनाप्यायये॰॥ अप्यायस्व समेतु ते॰॥ सं ते पयांसि॰ इति द्वा
भ्यां ततः सर्वप्रायश्चित्तमभिदाहुनीति बौधायनः॥ स्वान्नायोत्सेकेनुपर्व ३५

नेवोक्तं॥॥ अथ हविषि दुष्टे चतुःशरावमोदनं ब्राह्मणान्भोजयेदित्याश्व
लायनः॥ दुःष्टेऽपक्वे॥ तेनैवाः पक्वेन हविषा प्रकृतं कर्म समाप्य चतुःशराव
परिमितेन व्रीहिभिः पचनाग्नौ॰ ओदनं पक्त्वा ब्राह्मणभोजनं कार्यमित्यर्थः॥ केचि
त्त्वाज्यभागानंतरं रुद्रायस्वाहेति॰ अध्वर्युर्हुत्वा सर्वप्रायश्चित्तं कृत्वा तेनैव
यागमित्याहुः॥ क्षामेऽग्निष्टेनेष्ट्वा पुनर्यजेत॥ क्षामत्वं सर्वावयवव्याप्त्येवा ए
कदेशस्यापि योगं समाप्य पुनरस्यादि॰ आरभ्य दग्धहविर्देवतायागं कु
र्यात्॥ अन्येपि पुनरावृत्तिः॥ सर्वौदने हविर्नौदनं हविरप्रक्षिप्यैव

३६ स्तीमानन्तरप्रयोगेन्यद्विरुत्पाद्यतेनसहान्येःप्रक्रांतमेवप्रयोगंसमापये
त्।द्वेष्ट्विहदक्षिणांददात्॥अस्मिन्प्रयोगेदक्षिणांद्वेष्टुददान्नकूत्विग्भ्य
इतिवक्तिस्तु॥नुशब्दोऽत्रविकल्पार्थोनतुद्वेष्टुनियमार्थः॥तेनद्वेष्टुरभावे
न्यस्मैवाकस्मैचिद्दात्॥होत्रोक्तेतुन्यूनदानदोषेपुनरायतनादवदानमि
तिसूत्रदोषत्वेनेदंव्याख्यातंतथापुनरायतनादवदानंलुप्यात्तत्प्रयो
गेविहितदक्षिणांद्वेष्टुददादिति॥यदिपुरोडाशःस्फुटेद्वोत्पतेद्वाबर्हिष्येन ३६
नंनिधायाग्निमंत्रयेत॥अत्रद्वितीयवाशब्दः॥हविषामुद्वासनकालेपुरो

डाशेदीपतितेस्फुटितेउद्वर्त्तनेसंसर्पणेखंडितेस्थानांतरगतेउत्तानपतनेइ
त्यादिनिमित्तसंग्रहार्थः॥बर्हिषिनिधानमध्वर्युसूत्रोक्तक्रमेणसचंद्रिकायां॥
पूर्वोक्तनिमित्तेषुपुरोडाशमुद्वास्योपस्तीर्णायांदारुपात्र्यांप्राधायतत्रैवकिं
चिद्बर्हिरास्तीर्य।किमुत्पतसिकिमुत्प्लवसेशांतःशांतेरिहागहि॥अघोरोयज्ञि
सदनं योभूत्वासीदसदनंस्वमासीदंस्वमितिमंत्रेणसप्तवारंदर्भान्वेद्यां
ग्निः व्याहृतिंगासादयेत्॥ततोव्याहृतिभिर्दुग्धेकभ्यासेनव्याहृतीर्वदन्घृतकरो
र्मध्यादुत्तरतोगत्वापुनरेकभ्यासेनव्याहृतीर्वदन्घृतकरांतरेणप्रविश्य

३७ कर्मप्रतिपद्यते॥एतत्साम्नायतः स्फुटनादिनिमित्तेष्विति॥तदिथमाश्वलायना
नांप्रयोगक्रमेणोक्तिरुत्संमतं॥किमुत्पतसीति॥बर्हिषिनिधाय॥माहिंसी
र्द्यवप्रेरितआज्येनतेजसाऽप्यस्वमानःकिंचनरीरिषः॥योगक्षेमस्यहेत्या
त्रेम्मिन्नासीदबर्हिषीत्यभिमंत्रयतेऽप्यसर्ववत्॥यद्वाहोत्राक्रमेणैवा
प्यांमंत्राभ्या मग्निमंत्रणैव॥केचिद्यथासंख्यंस्फुटनपतनयो
अ र्निमित्तयोरुभौमंत्रौऽग्निमंत्रौइत्याहुः॥विज्ञायांतरमाहबोधायनः॥उ
द्वत्तेनपतनभेदनसर्पणेषुक्रमादुद्वत्तेनेकुलनाशः॥पतनेऽग्निनाशः॥ ३७

ण भेदनसर्पणेयेजमाननाशः॥तत्रोद्वत्तनेप्रथमंकृत्साम्नाप्रायश्चित्तेहिंसमाप्य
सुरभिमत्यायजेत्॥तस्याःप्रयोगः॥॥अग्नयेसुरभिमतेऽष्टाकपालःपुरोडा
शः॥पौर्णमासंतन्त्रं॥अग्निर्होतान्वसादयजीमानुपरुध्यमातुःसुरभाउलोके॥
युवाकविःपुरुनिष्ठऋतावाधर्त्ताकृष्टीनामुतमध्यइद्यः॥उपो३३येहे
अग्निंसुरभिमंतंमाध्यमकंदेवयंतिन्योअग्नयेयज्ञस्यजिह्वामविदामगुह्यां॥
सआयुरागात्सुरभिर्वसानोभद्रामकंदेवहूतिन्योअग्नयोवो३षतनेतुप्रथमं
कृत्साम्नायंप्रायश्चित्तंकृत्वातंतुमत्यायजेत्॥भेदनेतु

३८ नामपिसमाप्याः युष्मत्यायजेत॥ तत्राऽयुष्टे विश्वतोदध॰॥ आयुर्दा अग्ने॰॥
इतिपुरोनुवाक्यामाज्ये ॥सर्पेणेनधत्रसत्रेणायुष्कामेष्यावायजेत॥ तेऽत्र
येवक्ष्येते॥ उद्वासनकालादन्यत्रपननादोमिंदारिगपाः॥ प्रधानयागानेन
रे हविषांपतनादौप्रधानहविष्यन्यहविः पतनादोऽसाहीने स्वरमाणोः
कृतेकर्मणिचप्रणवेनव्याहृतिभिश्चस्रुवेणजुहुयात्॥ परिधिनिधानो
त्तरंप्राकृप्रयाजेभ्योंगारंबर्हिष्परिधिनिर्वर्त्तंस्रुवदंडेनपात्रांतरंनिद
ध्यात्॥ ब्रह्मा॥मातपोमायज्ञस्तपन्मायज्ञपतिस्तपत्॥नमस्तेऽस्त्वा ३८

यतेनमोरुद्रपराय तेनमोयत्रनिषीदसि॥ अध्वर्युयजमानोमाहिंसीरिति॥
परस्तान्निर्वर्त्तं॥सर्वत्रमातपः॥ब्रह्मापंमाहिंसी॰यजमा॰दक्षिणतः॥मात
हिं पः॥॰॥ होतारंमाहिंसीः पत्नींमाँसीर्यजमानं॰॥पश्चात्॥मातपः॰आग्नी
ध्रंमाहिंसीर्यजमानंमाहिंसीरित्युत्तरतः॥ इतियथादेशमभिमंत्र्याथेन
मनुप्रहरेत्॥ आयतनस्थवद्रोक्षिपेत्॥ ब्रह्मैव॥ आहंयज्ञंदधेनिर्ऋ
तेरुपस्थात्तंदेवेषुपरिदामिविद्वान्॥ सुप्रजास्त्वंप्रातहिमामदंतरहनो
देवामयि श्रर्मयछतेति॥ अथब्रह्मैवादवनीयेस्रुवाकृतिंजुहुयात्॥ सरु

३९ स्त्रश्चंगो दधभो जातवेदास्तोमपृष्ठोघृतवान्सुप्रतीकः॥ मानोहिंसीद्विंसितोने
न्याज दामिगोपोषंचनोयछस्वाहेति॥जातवेदसइदं०॥तनःसर्वंप्रायश्चि
त्तेऽग्नेवनुदुयात॥परिधिनिधानात्पूर्वंप्रया जेभ्य उत्तरंचे द्वहिःपतेद्वि
दंतएकं० इतिपूर्वोदितमेवप्रायश्चित्तं॥प्राक्प्रयाजेभ्यइतिस्रुगादाप ना
दर्वीक्रान्तोगृह्यत इतिवृत्तिरत्र॥नप्रदुश्चाघारयेद्यंकामयीतप्रमायु
कःस्यादितिद्विरंतस्याघारयेदितिनिषेधान्तथाघारपोसर्वंप्राय
श्चित्तं॥अत्रमान्यपालान्यनुद्वास्यपद्याश्रावयेत्तत्रवैश्वानरेष्टिसुर ३९

ष्मिनेष्टिंवापूर्णाहुतिंवाकुर्यात्॥तदुक्तमाचार्येण॥कपालेनपेनुद्वासितेभ्या
श्रावितेवासुरभयएवेति॥देवतेऽनुवाक्येयाज्येवाविपरिहृत्याज्येऽवदाने
हविषीवायद्वोदेवेत्याज्याहुतिंहुत्वामुख्यंधर्मंदधात्॥प्रयाजानुयाजा
नांन्यूनातिरेकेऽध्वर्युःस्रुवाहुतिंयस्माकत्रेतिजुहुयात्॥अग्निर्देवता॥
प्रयाजाद्यंगानामकरणेदर्शेभ्यःस्रुत्यपोस्रुवाहुतीर्जुहुयात्॥आहु
तीश्च॥इदंकर्मसमाप्तेःपूर्वं॥समाप्तेतुकर्मण्यिस्यैनःसत्यन्नइत्याहुती
नपुनर्योगः॥आवापनादिषुदेवताविपर्यासः॥अनुवाक्याविपर्या

८० नु सः॥अन्यदीय मन्यस्यैङ्ङ्याम्॥एवं याज्याविपर्यासः॥आज्यविपर्यासः॥
ओंहवोषट्तयोरित्यादि॥अवदानविपर्यासः॥पूर्वार्धे पूर्वमित्यादि॥ह
विर्विपर्यासोनिर्वापादिषुयुक्रमः॥यागेऽन्यदीयेनान्यस्ययागइत्या
दिषुयद्वोदेवाहुतिः॥मुख्यधनदानंच॥याज्यानुवाक्येस्तत्कर्मणिश्रेय यो
विहितयोस्तद्देवत्ययोरन्यदेवत्ययोर्वासर्वत्रविपर्यासेयागात्प्रागेवज्ञा
तेसतिप्रायश्चित्तंकृत्वापुनर्विहितेएवानूद्ययष्ट्यं॥कृतेतुयागेऽनु ८०
वाक्या विपर्यासेस्नातेप्रायश्चित्तमेवनपुनर्यागाभ्यासः॥याज्याया

मपिअविहितायांतद्देवत्यायांवाऽन्यथोक्तायांविहितदेवतोद्देशंकृत्वाविहि
तामेवदेवतांधाप्यदिवषट्कुर्यात्तदानाभ्यासः॥अतोन्यथाचेयागा
वृत्तिःकार्या॥यागविपर्ययेपिहविर्विपर्यासेयागावृत्तिर्नकार्यैव॥ए
तल्लक्षणंयागस्य॥देवतोद्देशेनद्रव्यत्यागोयागइति॥देवतातावद्विहि
तेवास्मिन्कर्मणिद्रव्यमपित्यजमेवगृह्णाति॥अयमभिप्रायः॥अन्यस्मैसं
कल्पितत्वात्स्वत्वमपिगच्छतीति॥एवंचेन्नस्याऽपिदेवतायैयष्टुंनशक्यते
स्वत्वाभावात्॥अथसंकल्पकालेएवयागःक्रियतइतिसुतरांविपर्यासे

८१ यागेनावर्त्तनीयः॥ यागस्याङ्गत्वात्॥ तस्मादयथासंकल्पकरणमेवा
ङ्गापराधेनयागाऽसिद्धिरिति॥ यदिपुनराग्नेयेनाग्नीषोमीययागेकर्त्तव्ये
षोडशायेनतदाग्नीषोमीयेनाग्नेययागःकर्त्तव्यः॥ सन्निहितत्वात्द्रव्यस्य
२ कार्यातस्यचाभावात्॥ तस्मिन्सन्निहितेसतिद्रव्यांतरेपादानमशास्त्रमि
ति॥ तस्मादेवंकृत्वाप्रायश्चित्तमेवकुर्यात्॥ यद्वादेवा॰॥ अत्रव्याहृति
होमश्चकार्यः॥ एतद्विपुर्यांसंतरितरहस्येवोक्तं॥ स्थानिनीमनावाह्य
देवतामुपोत्थायावाहयेत्॥ अयमर्थः॥ यस्मिन्कर्मण्यियत्यांदेवता ८१

मनावाह्येवोत्तरंकर्मकुर्याद्यदेवस्मरेत्तदेवोत्थायावाहयेत्॥ वर्त्तमानस्मरे
णावाहयेन्नमंत्रेण॥ मनसेत्येके॥ आज्येनास्थानिनीयजेत्॥ प्रमादादावा
हितांऽस्रुवेनिनीयजेत्॥ निगमेषुचनिगमेत्॥ अवदानदोषेपुनरायतना
दवदानं॥ गृहीतावदानेदुष्टेसतितस्मादेवपूर्वंदायदोतव्यमित्यर्थः॥ यदि द्रव
द्भूयमानाऽऽहुतिर्बर्हिःपरिधिंपतेत्तदादेवोजनमगन्यज्ञस्तस्यमाऽग्नी
रक्षत्यध्वर्युणाऽभिमर्शंकृतेऽग्नीध्रस्तमादायायतनेतूष्णींप्रक्षिप्यय
जमानआग्नीध्रायनकेनचिद्दोषादिनापूर्णपात्रंदधाति॥ सर्वंप्रायश्चि

४२ त्प्रा तं ब्रह्मञ्जुहुयात्॥ यस्मिन्कस्मिंश्चित्कर्मणि दक्षिणादानकाले तामदत्वाविस्मृ
त्योत्तरं कर्मारंभं कुर्यात्॥ तत्रयदि स्मरति तदैव ऋत्विग्भ्यः सर्वस्वस्याद्धा
त्मानमिदद्यात्॥ आत्मनिष्क्रीतेनमितानद्भातुमत्राकुर्वन्गवादिदद्यादितित्र
दीपे॥ आश्रावणप्रत्याश्रावणषट्कारेषुमंत्रांतेन्यूनातिरेकेसति॥
आश्रावितमत्याश्रावित मितिस्रुवेणजुहुयात्॥ हविरुछि
ष्टोद्वासनमरुत्वायद्यन्नयाज्यार्थमाश्रावयतितदाग्नयेदेवाइतिस्रुवा
कृतिंजुहुयात्॥ ततोहविरुछिष्टमुद्वासयेत्॥ यस्मिन्देशेस्खलनआश्रा ४२

३ षट्कारेअनागतेअतीतेवाहोमेकृतेपूर्ववन्मिंदादिगणेनजुहुयात्॥ ३

वयतितत्रस्थएवजुहुयात्॥ आश्रावणप्रभृतिहोमांतंपदंनचालयेत्॥
यदिचालयेत्पुनराश्राव्ययजेत्॥ यदिपुनराश्राव्ययजेत्तदासर्वंप्रायश्चि न
त्तंजुहुयात्॥ नास्यप्रयाजेषुप्रवृत्तिः॥ तत्राऽभिक्रमणविधौत्॥ इदमेयाश्रा ना
वणादोषाकृत्रेषेपित्तेयं॥ प्रधानयागोत्तरंहविर्नाशेवचनादाज्येनस्विष्ट
कृत्॥ चतुर्धाकरणादीनांलोपः॥ उपांशुमंत्रादिस्वरोयत्रविहितः तद्वैषऽ
ध्वर्युः॥ आभिगऽर्भिर्यऽस्यामस्वाहेतिस्रुवाकृतिंजुहुयात्॥ यदेकश्रुत्या
विहितंतद्वैषेविछुप्तस्मृत्यातदेवपुनःपठेत्॥ दर्शपूर्णमासयोश्चत्वारऋत्वि

८३ ऽः तत्र यत्संख्यया ऋत्विग्भावस्तत्संख्यया सर्वप्रायश्चित्तं प्राकृप्रयाजेभ्यः
कार्यमिति प्रदीपे॥ केवलएकाध्वर्युप्रयोगक्रमः प्रायश्चित्तक्रमश्चास्मत्कृत
प्रयोगरत्नमालायां दर्शपूर्णमासप्रकरणेऽस्माभिश्चरितेन हपुनर्लिखितः॥दु
ष्टेन हविषेद्धासमिष्टयजुषः प्राकृज्ञाने प्रोवाज्येन पुनर्यागः॥ऊर्ध्वं चेत्पुन
रन्वाधानाद्याऽवृत्तिः॥दुरुहविष्केयागेयत्किञ्चिदुष्टं इतिस्मरेत्तस्येवाऽवृ
त्तिर्नसर्वयागस्य॥दुष्टेऽपिशिष्टेपिनाऽवृत्तिरितिकात्यायनोब्रवीत्इति गोपा
लः॥एवंविधयोर्दर्शपूर्णमासयोर्विहितकालातिपत्तौ प्रायश्चित्तविधिः॥ ८३

॥दर्शस्यपूर्णमासस्यवैकैकस्यातिक्रमेपाधिकृतीकार्येतिभगवान्नाश्वला
यनः॥उभयोरप्यतिक्रमेपाधिकृत्येवेतिदेवयातः॥इहसमानकालानामने
कनिमित्तसंपातेपिसकृदेवपाधिकृतिंकृत्वादर्शपूर्णमासावपिकर्त्तव्यौ
किंवापाधिकृत्येवेति॥तत्रपाधिकृत्येवकर्त्तव्यानदर्शपूर्णमासावित्येके॥
अतीतकर्मसंपत्यर्थत्वादिष्टेः॥अन्येतुपाधिकृतिंकृत्वादर्शपूर्णमासाव
पिकर्त्तव्यावित्याहुः॥पधिकृतःकालातिपत्तिदोषमात्रनिर्घातत्वादिष्टिरपि
कार्येतिहोत्रा लोके॥एवंद्वयोर्बहूनामप्यतिपत्तौपाधिकृती॥अतीतया

नेन समानतंत्रा वा॥ गौणकालातिक्रमे पाथिकनीष्टिमात्रेण यागावृत्तिरितिभावः॥ प्रा
यश्चित्तप्रदीपिकायांतु त्रागामिपर्वण्यपि श्रतिपन्नेदर्शेवापौर्णमासंवापथिकन्तु
रंवकुर्यात्॥ तदाप्रयममग्नेः पथिकृतः प्रचारः॥ ततोऽग्नेयादीनां॥ तत्राग्नेः पथि
कृतोमुख्यत्वादनङ्गान्दक्षिणेतिकेचित्॥ प्राकृतंतंत्रातिपात्तित्वात्पथिकृतःप्राकृ
त्येवदक्षिणेत्यन्ये॥ एवंमुख्यकालातिपत्तेः प्रायश्चित्तमुक्तं॥ गौणकालेप्यनी
तेपर्वण्यागतेऽतिपन्नस्याकालत्वादक्रिया॥ उक्तरेष्याधिकारार्थंप्रायश्चि
त्तमेव॥ एवंद्वयोर्बहूनांवातिपत्तौपर्वण्यागतेप्रायश्चित्तमेव॥ नातिपन्नया

गः॥ एकेकस्मिन्पर्वण्यतिक्रांतेप्राप्तकालस्यदर्शस्यपूर्णमासस्यवायश्चाग्नेयो
ष्टा कपालःतमेवाग्निंपाथिकृतंकृत्वायजेत॥ पथिकृतेनविशिष्टमित्यर्थः॥ प्रा
वाहनादिषुश्चग्निंपथिकृतमावाहयेत्॥ यद्वाबहूनांनिमित्तानांश्राद्धेनैमित्ति
कस्याप्यावृत्तिः॥ यद्वाबहूनांपर्वणामतिपत्तौबहुपर्वातिक्रमप्रायश्चित्तार्थमन्वा
रंभणीयांकृत्वाश्चतिपन्नयागार्थंपाथिकृतींप्रतिनिमित्तमारभ्यकुर्यात्॥ त्रप्रा
रभ्यदर्शपूर्णमासस्यात्यये प्रायश्चित्तंवैकल्पिकमितिद्वैधे॥ दर्शपूर्णमासयोः
प्रक्रांतयोर्दैवान्मानुषाद्वाविरोधात्त्वकालेकर्तुमशक्ययोःशांतेविरोधेनैतरम

नं

४५ तीतस्याग्नेयस्यस्रुत्तेऽग्निंपधिकृतंनिरूप्ययथाप्रकृत्यग्नीदेवतांनिरूप्ययथापूर्वं
समापयेत्॥निर्वापाद्ऊर्ध्वंयदिविरोधादिनाकालोतिपद्येतनतस्मिंष्टकृद्याज्यानुवाक्ये
पाधिकृतीएवकुर्यादिदंप्रायश्चित्तंषण्मासादर्वाकु॥षण्मासमप्यतीषण्मासाद्ऊर्ध्वंसं
वत्सरपर्यंतंचदर्शपूर्णमासयोरतिपातनेहोमानिपत्नीविहिताइष्टयःकार्याः॥
अग्निषुसमारूढेषुबहूनांदर्शपूर्णमासानामकरणेऽग्नयेव्रतपतयेऽग्नये
पवमानायाग्नये नेतुमतेऽग्नयेपधिकृतेच
क्रमेणपृथक्तंत्राष्टीःकृत्वाऽतिपन्नयागार्थंपाधिकृतींकृत्वाऽनंतरातिपन्नया ४५

४६ यजेत॥ "प्रयोगपरिज्ञानेऽश्वलायनः॥नातीतेऽग्नितुरेयींचतुर्थींमध्यपेचकेऽनवम्यांच
द्वितीयायांकार्यीस्वाकृतयस्तचेति॥स्वाकृतयःस्वाहाकाकृतयइत्यर्थः॥ "इतिदर्श
पूर्णमासयोःकालातिपत्तिप्रायश्चित्तं॥ ॥अयादीक्षमनंतेनगुरुणाकरुणाब्धिना॥
लेखिकंशिष्टसंतुष्टोप्रायश्चित्तकृतंहृदं॥ ॥इत्यनंतदेवीयरघुनाथविरचितेप्रा
यश्चित्तकृतंहृदेदर्शपूर्णमासप्रायश्चित्तप्रकरणंसमाप्तं॥ ॥श्रीरस्तुसंपूर्ण
ग्रंथमस्तु॥ ॥ शुभं

४६

॥इतिप्रायश्चित्तकुतूहलेदर्शपूर्णमासप्र॰॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

दर्शपूर्ण॰ अनुक्रम॰

अथप्रायश्चित्तकुतूहलस्यदर्शपूर्णमासप्रकरणस्यानुक्रमः

१ मंगलाचरणं
१ पर्वनिर्णयःसंधिकालः॰
२ अन्वाधानाऽकरणप्रा॰
३ प्रथमारंभेमुख्यकालः॰
३ कालातिपन्नोविभ्रेष्टिपूर्वकंदर्शपूर्णमासारंभेकृ
३ विभ्रेष्टिप्रयोगः॰
५ प्रथमदर्शेतिपन्नेप्रा॰
५ दर्शपूर्णमासादिकर्मणांप्रथमप्रयोगेपत्नीरजस्वलात्वे
६ प्रथमारंभेमासावाधारोच॰
६ प्रथमदर्शेपिंडपित्र्यहारं भार्याक्यत्नीरजस्वला॰
६ दर्शपूर्णमासयोर्द्वितीयादिप्रयोगेपत्नीरजस्वला॰
७ दर्शपूर्णमासादीनांद्वितीयादिप्रयोगःअतिपद्येत॰
७ ऋत्विजांवरणोत्तरमाशौचे॰
७ पशुचातुर्मास्यादेःकालातिप॰
८ पिंडपित्र्यलोपेप्रा॰
९ यस्यदर्शोल्कानयजेत्प्रा॰
९ त्रेधातव्येष्टिप्रयोगः॰
१२ आधानादिकर्मणांसंकल्पंकृत्वानयजेत्प्रा॰
१२ अन्वाहिताग्न्यनुगमनप्रा॰
१४ आहवनीयदक्षिणाग्न्योर्युगपदनुगमनेप्रा॰
१३ गार्हपत्यानुगमनेप्रा॰
१३ आहवनीयानुगमनेप्रा॰

१४ अन्वाहिताग्नेःप्रयाणोपपत्तौ०
१५ समुद्रगामिनीनदीलक्षणं
१५ अनडुत्स्नानग्नीन्हरंतःशाम्या परासारूर्ध्वमुत्सृजेयुः०
१५ पत्नीरजस्वलाप्रसूताचे त्प्रायोसंकरोक्ति०
१६ आग्नेसमारोपणविधिः
१७ मंथनविधिः
१७ वाणिसमारोपेमंथनवि०
१८ यजमानेप्रसन्निहितेभ यवरापत्नीअग्नीनाधाय गच्छति
१८ अथयष्टव्यदेवतामपहा यश्चयष्टव्यदेवतांयजेत्प्रा०
१९ बर्हिषस्तिरोधिप्रस्तरविध्यादीनांनाशेप्राय०
१९ अन्वाधानेष्टिमध्येसूर्यचंद्रग्रहणेप्राय०
२० दुःस्वाश्रुपातेप्राय०
२० यजमानस्यऋत्विजांचरेतःपातेप्राय०
२१ पर्वपर्णीस्वकारागमनेप्रा०
२१ पर्वदिनेक्षाराभिषभक्षणे०
२१ इध्माबर्हिषोन्यूनातिरेकप्रा०
२१ मंत्रेणस्थापितमिध्माबर्हिरधःपतेत्प्राय०
२२ अथसांनाय्यदोषेप्रा०
२२ अथसायंदोहनाशेप्रा०
२२ अथप्रातर्दोहनाशेप्रा०
२३ सांनाय्येहविर्बिंदुपतने०
२४ सांनाय्यस्कंदनेप्रायेप्रा०
२५ चंद्रदर्शनदिनेयागेकृते०
२५ अभ्युदितेष्टिप्रयोगः

दर्शपूर्ण

अनुक्रमणिका

२६ वितनेकर्मणिभयमापद्येत०
२६ यजमानमंत्रेस्वरादिभ्रंशेप्रा०
२६ अथपवित्रनाशेप्राय०
२८ प्रणीताप्रोक्षणीःस्कंदनेप्रा०
२८ स्रुक्प्रनिर्वापेप्राय०
२८ भागिन्येदेवतायैनिरूप्यप्रोक्षणकालेअभागिन्येप्रोक्षेत्०
२९ अंतरागमनेप्राय०
३० हविषिकेशकीटपतंगाद्युपहतेप्राय०
३० अभागिन्येनिरूपभागिन्याःस्मृतौप्राय०
३० रजस्वलासूतिकाचंडालादिहविस्पर्शेदृष्टवा०
३१ प्रयाजार्थंगृहीतस्याज्यस्यनाशेप्रा०
३२ उपस्तीर्णाज्यनाशेप्रा०
३३ साधारणहविस्कंदनेप्रा०
३३ कपालानांन्यूनातिरेकेप्रा०
३३ कपालभेदेप्राय०
३४ कपालानांस्पर्शेप्राय०
३४ दारुमयानांकाकादिस्पर्शेप्राय०
३४ स्रुगादिभेदनेप्राय०
३५ कपालेनिहितांगारनाशेप्रा०
३५ आज्यमसीत्यादिमंत्रेचुरुकश्वासभंगेप्राय०
३५ जुहूपभृतोर्विपर्यासेप्रा०
३५ चरौतापाद्युत्सिक्तेप्राय०
३६ अपक्वहविषायागेकृतेप्रा०
३६ अवदानानंतरंहविष्टुष्टेश०
३६ पुरोडाशःस्फुटद्दोसतेतवा०
३८ सुरभिमतेष्टिप्रयोगः०

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

३८ भक्तिहीनेत्वरयायागेक्रतेः
२ ३८ परिधिनिधानोत्तरमङ्गारा
स्राक्अंगारबहिःपतनेप्रा०
४० देवताअनुवाक्यायाज्यावि
पर्यासेप्राय०
३९ प्रहेनआधारकरणेप्रा०
३९ कपालानांअनुद्वासनेप्रा०
४० प्रयाजानांन्यूनातिरेकेप्रा०
४० देवताविपर्यासेप्राय०
४० अवदानविपर्यासेप्राय०
४० कपालेनष्टेप्रा०
४२ हूयमानाहुतिःबहिःपरि
चिपतेत्प्राय०
४२ कालेदक्षिणादानंनकृतंचेत्
४२ आश्रावणादिकर्मसुन्यूनातिरेके
४२ हविरुच्छिष्टेहुतसंसृक्त
तायघृतयाजेर्यजेत्प्रा०
४३ आश्रावणप्रभृतिहोमा
नपदंनचालयेत्यदिचा
लयत्प्राय०
४३ आश्रावणादिकालवा
ग्नेषेप्रा०
४३ प्रधानयागोत्तरंहविर्नीते०
४३ उपांशुसंज्ञादिस्वरभेष०
४३ ऋत्विक्संख्याऽन्यूनेप्रा०
४३ दुष्टेनहविषेष्ट्वासमिष्ट
यजुषःप्राग्लाजेप्रा०
४३ दर्शपूर्णमासातिमेप्रा०
४४ बहुपवीतिक्रमेप्रा०
४५ षण्मासपर्यंतंदर्शपूर्णमा
सलोपेप्राय०
४५ संवत्सरंदर्शपूर्णमा

४५ होमलोपेप्रायश्चित्तं०
२ ४६ दर्शपूर्णमासोऽ
काले कुर्वन्नरिक्तादितिथो
नकुर्यात्०
इतिप्रायश्चित्तकुतूहले दर्शपूर्ण
मासस्यानुक्रमणिकासमाप्तिं
व्रजा॥ ॥छा॥ ॥श्री॥ ॥